Neelkantha Shivacharya

Brahma, mimansa bhasye - Pt I

ब्रह्म मीमांसाभाष्ये - प्रथम अध्याय

Sanskrit

Paper — Handwritten

1908 (110 years old)

228 Folio

8.5" X 7"

Complete

~~1410~~ Party (73)

१६१६ B.
~~८१५५ D.~~

श्रीकंठ भाष्यम्

(नीलकण्ठ भाष्यम्)

(नन्दिनागर्यां लिप्यां समावेशितम्।)

Note:- printed in 1908.
No. Sanskrit 1/10
This MSS. upto
contains चतुस्सूत्री (सू. 1-8.)
12.3.54

१ - प्रत्यूंछनं -
तादृपता पुट भाग
रूप स्वान्य परिपूर्ति
व्यंजकं ॥

I/A

श्रीः

१. .... यपन तदनंतर तु
धर्म विचार तस्य तद्दास क्ष रस
य भावात् तथाच .... यप
ना० ..... म विचार .... म
स्यारं भ० धर्मविचारानन्तरं- नवयं
धर्म ब्रह्म विचाररूपयो शास्त्रयोः अ
त्यंत भाद न० ।क० त्वक त्व वा।दन०
धर्म ब्रह्मणा — राधनाराध्य भूतयोः
प्रतिपादक म थातो धर्मजिज्ञासेत्या
रभ्य उन...... वत्पर्यंतं एकमेव
शास्त्रं, तत्र अथातः शेषलक्षणमित्यादि
वद्दवांतर परिच्छेदाथोर्थ अथातो ब्र-

(१)
ॐ नमोर्हं वदार्थार्थ त्यारभ्य, भवतुनाम तादृ
शम ~~[struck]~~ दय, इत्यंताः ग्रन्थाः लुप्ताः॥

ब्रह्मजिज्ञासेत्यारंभः· अन्यथा धर्मस्य ब्रह्म
बोध हेतुत्वात् तद्विचारोपयुक्तानां श्रुति
लिङ्गादीनां च ...... बाद स्मृत्यादि प्रा
माण्य प्रतिपादनादीनांच .... ब्रह्मविचारेव
युक्तत्वाच्च धर्मविचारानन्तरं ब्रह्मवि
चारः· साधनं विना साध्यानिष्पत्तेः-
ब्रह्मबोधं प्रति· धर्मस्य साधनत्वेन तमेतं
वे ...... न .... दिषन्ति यज्ञेन दानेन
तपसा नाशकेनेति· श्रुतिरेव भगवती
प्रमाणं· जपकर्मणो ब्रह्मबोध साधनत्वे
तदेव विचार्य मनुष्येयंच· किमनेः ...। वे
दांत वाक्य विचार प्रयासेनेति वाच्यं
तस्य फल .... प्राचित्तशुद्धि संपा
दन द्वारा बोधहेतुत्वात· तथाभियुः
स्मृतिः· यस्यैते चत्वारिंशत्संस्कारा इत्या
दिना २ ब्राह्मणस्यायुज्यं स्यात्लोकः कथंच

I 13· गच्छतीं तेन गर्भाधानादिं ……
…… व्रीहि प्रोक्षण …… सर्व कर्मणा
संस्कारकत्व स्य व ए त पुण्य लोक
भवतीति मुमुक्षुक्षम फल स्वातंत्र्यं
न स्यादिति चेन्न· पुण्यलो क ……
प त द ……… ध्य रहितेन पुंसानु
ष्ठितकर्मणां चित्तशुध्यादि संस्कारज
नकत्वोपपत्तेः· तथाच तस्य पुंसो
यदेव ज्ञान फलं तदेवकर्मफलंच·य
था व्रीहि प्रोक्षणं दर्श पू ण ……
रिति चेन्न …… णतया स्वतंत्र विध्यं
त…… विहितस्य सौत्रामणी बृहस्पति
के ग्निचयन वाजपेयाद्यं गत्व कु
भय विधिबलात् उभयसिद्धेः ·अतो-
यावदुत्पद्यते ज्ञानं तावदनुष्ठे ……
…… समुच्चेतः- ननुकर्मब्रह्म विचारयो:

क्रमनियमः - कथमुपपद्यते ....

IIA .... १। वार्ष

उपयाजवदेकांगी प्रयुक्तानेकांगत्वेन

वौढ्ढहनादिवदधिकारांतरप्रयुक्तयुप

जीवित्वेन वा प्रडथाधात्फलप्रत्य

नत्वा भवति तत्प्रात्वावचारः या श्रु

त्यादिप्रमाणेनाप्युपलभ्यत तत्र कर्म

कृत्स्न .... श्रुति यदि श्रुत्या

दिप्रमाणं न संभवति तदा खलु न

ध्यात्वं स्यात्: विद्यांचाविद्यां च यस्त

द्वेदोभयं सह तेनेति ब्रह्मवित्: पुण्यकृ

च्च सत्येन लभ्यं तु प्रसादे पः आत्मा

सम्यक् .... मित्यादिका ज्ञान

कर्म समुच्चय बाधिना श्रुतिरुपलभ्यते न

तः कर्मज्ञानयोः मोक्षैक फलत्वात् तद्विद्या

रयोरपि क्रमनियमो युक्तः यच्चश्चरगृहे

णमात्त पर्यवसायित्वं ....
चारयो... प्रवृत्त्यसंभवः स्वाध्यायनेना
पाततः पदार्थमात्र प्रतीतेः तदनु मन्त्र-
-स्थूलोपासन ज्योतिष्टोमादि विधायकानां
वाक्यानां सूक्ष्मोपासनभूत दहरादि
विद्य... .... विरोधाभासं प्र
दृष्टेः तद्विचारे पुरुषार्थकांक्षी पुरुषः
स्वयमेव प्रवर्तते ततो नात कर्तव्यो
विचारः नतु श्रोतव्य इति वाक्येन वे
दांत श्रावणं स्वाध्यायविधीयत इति.......
.... त्यभावात्- तथाहि
वेदांत श्रावणं नाम पूर्व विधि गोचरः -
प्राप्तत्वात् प्राप्तिश्च ... दा० त श्रावणं ^तता
स्व विषयो पात्त ... तिसाधनं श्रास्त
श्रावणात्त्वात् ॥ ....
II 13 १ .... गोचरत्वं अवधानचित्त

इष्टफलस्य उपार्जितस्याप्राप्तिं नच
परिसं...... एवहि वेदान्त शात
व्या नाश्यतव्या. ।त व २यवस्य
त तव्या. . . . . .र्थी
संभवः यदि वेदान्तश्रावणस्य परिसं
ख्यापरत्वं कर्मकाण्डे श्रावण निषेधत्व
रूपत्वमिति विचारः तदा विचाराभावात्
कर्मानुष्ठानुष्ठानासंभवः तदभावे चि
त्त शुद्ध्यभावात् ज्ञानानु. . . . .
समीचीनं ततः सकल...... त्वर्पञ्चा
कार पर् शक्ति वि...... तीय वैभवस्य
सकल निगम सार रुद्रस्य निधान...
. . . . . भव शिव शर्व पशुपति परमे
श्वर महादेव रुद्र शंभु . . . .
सार ... काशित महामहिम विलासस्य
स्वशेषभूत निखिला चेत... समुपासनानु

गुण समुदित निजप्रसाद समर्पित पुरुषार्थ
सार्थस्य परब्रह्मणः प्रतिपादकमुप
नि....... न स्मृतीतिहास पुराणा
भियुक्त सूक्ति संदर्भ कृतोपबृंहणस्य
विधिनिषेध विकल्प समुच्चयो त्सर्गाप
वाद बाधाभ्युच्चयादिमती निखिलपुरु
III
A. षार्थ रत्नाकर ....णं समप्र
बोधसाधनस्य भगवतो धर्मस्यवि
चारानन्तरं रूत्यर्थ शब्दार्थो निर्णी
तः अतः शब्दोऽयं वृत्तस्य हेतुभावे
वर्तते यतो धीतवेदेन धर्मो विचारितः
अतस्तनु ष्ठान संपन्न चित्त शुद्धिना
तत्काल संपन्न विवेकादि गुण सहकृत
प. ०. भक्त संभावितो नेन ब्रह्मापि नि
रतिशय निःश्रेयसकरं विचारणीयमि
ति, ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति क

कर्मनिष्पत्ती· परीक्ष्य लोकान् कर्मचि
तान् ब्राह्मणो नि...र्वेदमायान्नास्त्यकृ
तः कृतेन तद्विज्ञानार्थं सगुरुमेवाभि
गच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनि...
मित्यादिना ...... य.. ब्रह्मविचा
रणार्हं भवति नवेति सं~~...~~देहः -
पूर्वपक्षस्तु ब्रह्म विचारयोग्यं .... ति
तत्र संदेहाभावात् .... हाभावः
अयमात्मा ब्रह्मेति श्रुतिरहमितिप्रत्य
येन ... (प्र)त्यक्षसिद्धमेवात्मानं ब्रह्मे
त्युपदिशति ततः कुतोऽत्र संदेहः क
ळङ्कप्रसङ्गः किंच विचारस्य फलं हि...
... पार्थं ज्ञानं· ज्ञानेन ज्ञेयपरिच्छेदः
वेदांतजन्यं ज्ञानं ब्रह्म परिच्छिनत्ति· न
वा· यदि परिच्छिनत्ति तस्य परिच्छेदकतो
तत्व भंशपसंगः - यदि न परि.....

द्वैत द्रष्टव्या ... पर्काद्वैत अयमि-
तिहि यदि.......... घटोव गम्यते त-
तो ब्रह्मविषयं ज्ञानमपि न संभवति. तथा-
पि न प्रयोजनं च किंचित्पश्यामः न
मुक्तिः प्रयोजनं अनादिसिद्ध संसारि-
III 13 .... पे. क्ष मः नं..... समा-
रंभणीयं शास्त्रं ब्रह्मणस्त्वैकेश्वरतया
विषयत्व संभवात् तन्निर्णयस्य सप्र-
योजनत्वाच्च : यदयमात्मा ब्रह्मेत्यादि-
श्रुतिरमुमेवाहं का ....
तत .... स्त उपप्लव कलंक नि-
रतिशय ज्ञानानन्दादि शक्तिमहिमातिश-
यवत्वं हि ब्रह्मत्वं. अनाद्य ज्ञान वासना-
वर्षंभ विजृं त वाच त क..............
...... निर्गम व्यापार पद मि स्सु .... प .
... त्वं तु जीवत्वं . कन्यमेतयो परस्परवि-

...... णपो रेकात~~ममात~~ भाव माहु कुरु तयइति .... शयः किं नस्यात् अपिचैव मपि सन्दिह्यते अन्नं ब्रह्म मनो ब्रह्म विज्ञानं ब्रह्म आदित्यो ब्रह्म नारायण... .. त्यादयो न्यमन्यं ब्रह्मेत्याहुः तत किंवा ब्रह्मेति बहुधा सन्दिग्धं ब्रह्म विचारार्हं भवति त ...... म..ना निश्चित स्य भक्तिज्ञान विशेषाभिमुखस्य परम कारुणिकस्य महा...... शिकस्य सर्वानुग्राहकस्य शिवस्य परब्रह्मणः प्रसादातिशयेन अस्याधिकारिणः प्रध्वस्त पाशपरला प्रत्य..... त निरतिशय ज्ञानानन्द स्वरूपा तत्समान गुण सार कैवल्य लक्ष्मीः प्रयोज.. .. भवति ततः सविषयं सप्रयोजनं वेदान्त शास्त्रं यदुक्तं ज्ञेयपरिच्छेद~~स्मात~~

स्वपत्वात् ज्ञातस्य तदपरिच्छिन्नब्रह्मवि
षयं नभवतीति· तद्विचारविलसितं··
तुमिदमिति ब्रह्मणः परिच्छेदासंभ
IV
ववे··· लाक्षण·· ····· तरव्यावृत्तता
मात्रेण ··· च्छेदसंभवात् – लाक्षणेन
परिच्छेदोहि सर्वत्रलक्ष्य विषय मि··
त·· व्यावृत्ततया ज्ञानं – उद्दिष्टस्य ब्र
ह्म··· लाक्षण वेदांतवाक्यैः ··· स्वपि
ते परीक्षितेच तल्लक्षण शून्येभ्यस्स
·········· तीयेभ्य स्तादितर सकल
पदार्थेभ्यो व्यावृत्तं यत्तद्ब्रह्मेति· वि
ज्ञायते ततःसमीचीनो·प···· विष
यः शास्त्रारंभः········ दिरप्य··प्रयो·
जनं च तत् खलु नपेक्षावतीं विचा
रकक्ष्यामारोह··· अस्य वेदांतशास्त्र
विचारस्य प्रमाण युक्त्याभास प्रतिभासव·

शास्त्र संदेहास्पदं ब्रह्म । ... भवति - ब्रह्म विद् ... प्रो । तिच ... ज्ञात्वा शिवं शान्ति मत्यन्तमेति । ईशं तं ज्ञात्वा अमृता भवन्ति । तं क्रतुं पश्यति वीत शोकः .... सादात्म्य हेम हेमानमीशं आत्मानम रणीं ये कृत्वा प्रणवं चोत्तरारणिम् ध्यान निर्मथनाद्देव ...... दहति पं ... ... त्वा देवं मुच्यते सर्वपाशैः त. इत्या दि श्रुत्यनुसारेण तदुपास ....

IV. ... रिणः पाश विच्छेद लक्षणा मुक्तिः पर्यो ... न ... ऽस्त्यास्तीति । प्रथमाधिकरणे अः प्रतिपादितं - इह उद्दिष्टस्य ब्रह्मणो यन्निश्चायकं तल्लक्षणं किमित्याकाङ्क्षायां तल्ल .... द्वितीयाधिकरण मवतारयति भगवान् सूत्रकारः.

॥सू. जन्माद्यस्य यतः॥

ज्ञाते .... न वैराग्यर्पयति. अज्ञा
ते तदाकाङ्क्षानुपपत्तेः कल्पमताक्ष
ह्मणो लक्षण ... यन प्रसङ्ग इति नङ्गी
कनीयं अध्ययनादापातती ज्ञाते ब्र
ह्मणि तद्योगात् ज न ..... दि...स्य
य...न. इति सूत्र ... द ..... ः. जन्मा
दिकं. जन्मस्थितिः प्रळय तिरोभावानु
ग्रह रूपं कृत्य मस्य चेतना ..... त
न संमेळन सम ... सी भूतस्य प्रपंच
विलास स्य यतो यस्मात् तद्ब्रह्मेति.
श्रोब्रह्म- यतोवा इमानि भूतानि जायंते-
येन जातानि जीवंत. यत्प्रयन्त्यभि
VA संविशान्ति तद्विजिज्ञा........ ं इति.
प्रधान श्रे... इप ....
स्थिति ब्रह्महेतुः सत्यं ज्ञान मनन्तं ब्रह्म.

ऋतं सत्यं परं ब्रह्म पुरुष इत्यादि स्वरू
पाय वै नमः इत्यंतं वाक्यं विषयः.....
—। तज्जगतो जन्मादिकं ब्रह्मणा लक्ष
णा..... भवति नवेति संदेहः.. न संभ
वति संबन्धाभावात् किंचानन्दोब्र
ह्मेति व्यञ्जनादित्यत्रानन्दस्य जगज्ज
न्मादिलक्षणं पर्यवसास्यति..उप
न्यत्र सदेव सौम्येदमग्र आसीदिति.
स.... जगत्कारणत्वमवगम्यते. स
त्यं ज्ञानमनन्तं ब्रह्मेति. ज्ञानमेवापरि
च्छिन्नं जगत्कारणं ब्रह्मेत्येकत्राव
गम्यते विज्ञायते अपरत्राच - यदा
तमस्तन्नदिवा.................सच्छि
वएव केवल इति. शिवशब्दवाच्यं
वस्तु कारणत्वेन सकल पूर्वभावि ब्रह्मे
ति विज्ञायते. अत्रानन्दादीनां ब्रह्मत्वे

विकल्पो वा समुच्चयो वा. विकल्पे शु
त हान्यादि दोषप्रसंगः ....
न विकल्पेपि ब्रह्मानेकत्व प्रसंगः -
समुच्चयपक्षे नेषां धर्मरूपत्वात् -
निखिल जगन्निर्माणोपाय ज्ञान विशे
ष विशिष्ट ब्रह्मत्वासंभवः . अचिन्त्य मा
यां तु प्रकृतिं ...आदि श्रुते र्माया..
.... — .... कारणत्व मभि
धत्ते तदेव युक्तं ब्रह्मणो .... रूपस्य
जगत्कारणत्वे तस्य विकारापत्त्या
निष्कलं निष्क्रियं शांत मित्यादि श्रुतिभं
गप्रसङ्गात् . अत... सर्वथापि ब्रह्म
V 13 णो जगत्कारणं ....
.... तुं.... शक्य मित्येवमादौ पूर्व
पक्ष विक्षेपे प्राप्ते क्रमः - - यद्यपि
जन्मादेर्जगन्निष्ठत्वे... ... मण्यसं

बन्धः स्तु नापि तादृक्वान्येन लक्षणत्वं
युज्यते ...... सर्वज्ञत्वादि विशिष्टम
.... देव जगत्कारणं
ब्रह्मेत्युच्यते आनन्दादीनामत्रैव धर्मि
णां पर्यवसानं भवति. सर्वज्ञत्वं नित्य
तृप्तत्वं अनादिबोधत्वं स्वतन्त्रत्वं-
लुप्तशक्तत्व मनन्तशक्तित्वं चेति एता
नि सर्वज्ञतादीनि .... ध्यान.
पं क्षित कोष्ठकरण निष्कलं कानुभवि
षय निखिल वस्तुत्वमिह सर्वज्ञत्वं - य
स्सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः
त्यादिभिः इदं ब्रह्मणास्सिद्धं. अनेनस
कलचेतन बहुविध ....
णानुकूल तत्तच्छरीर निर्माणोपाय-
सामग्री विशेषज्ञं ब्रह्म निमित्तं भवति.
निरस्त समस्तोपप्लवकलङ्क निरतिशय

यानन्द परिपूर्णत्व मिह नित्यतृप्तत्वं अ
तएवानन्दो ब्रह्मेति श्रूयते. यः स्वल्व
न्यूनं तदात्मा आनन्दमय इति पस्तु
त्य सैषाऽऽनन्दस्य मीमांसा -
भवतीत्यारभ्याभ्यासात् निरतिशय-
निरस्कत्वेन सर्वकों ब्रह्मण आनन्द इ
ति निरूपितः परब्रह्म धर्मत्वेन सर्वा
नन्दो ब्रह्मेति प्रचुरत्वात् ब्रह्मत्वेनोप
चर्यते - तद् .... नित्य
तृप्त मित्युच्यते। ब्रह्मणो मनसैव महा
नन्दानुभवः - नबाह्यकरणद्वारा
तथाहि श्रुतिः - आकाश शरीरं ब्रह्म
सत्यात्म प्राणारामं मन आनन्दं शांतं
- समृद्धं अमृतमिति - आ. आकाश
ते इत्याकाशः प्रकाशश्चिदंबरमुच्यते:
नतु भूताकाशः - विशेषाभावात् निरवि

ल जगदण्ड पिण्ड बुद्बुद निकुरुंब जल
धि स्थानीया परप्रकृतिरूपा परमशक्ति
र्हि चिदंबरमुच्यते - तत्स्वरूपं ब्रह्माका
श शरीरं, प्रकृतित्वं चिदाकाशस्य सर्वा
णि. हवा- इमानि भूतानि आकाशादेव
समुत्पद्यंते आकाशं प्रत्यस्तं यन्ति -
आकाशो ह वै नाम नामरूपयो.. र्निर्व
हिता इत्यादि श्रुतिसिद्धं सत्यात्मसत्ता
रूपं प्राणारामं प्राणस्य सकलाधारभू
ता चिदंबर शक्तिरुच्यते. . स्वरूपभू.
तायां तस्या मेवा रामो यस्य तत्प्राणारा
मं मन आनन्दं मनस्यानन्दो यस्य. न
काहै कारण.. तन्मन आनन्दं - अत्राप्यानं
द इति चिदंबर शक्तिरुच्यते -- तथाहि.
श्रूयते. कोह्ये न्यात् कः प्राणा:--. य
दे.. ष आकाश आनन्दो नस्यात् इति

शान्तिसमृद्धं शिवतासंपन्नं अमृतं अ
नादिमुक्तं अत्त सच्चिदानन्दरूपं परमा
त्मस्वरूपं ब्रह्म, स्वरूपानन्दं मनसैवानु
भवति बाह्यकरण निरपेक्षमिति सिद्धं।
मनस्यानन्दमित्यनेन उ.. मेव ज्ञापकं -
ब्रह्मभावमुपगतानां मुक्तात्मनां निरति
शय स्वरूपानन्दानुभव साधनं बाह्यक
रण निरपेक्षम् अन्तःकरणमस्तीति अतो
बाह्यकरण निरपेक्षेण शुद्धबोधशक्तिरू
VI13. पेण, मन ं....नन्दं मनं तं अनुभवन्ति ब्रह्म
नित्यत्र दृष्टं; न तस्य कदापि बाह्य सांसा
रिक सुखलवापेक्षा भवतीत्यर्थः - सु,
तस्सिद्धं निरतिशय ज्ञानवत्व ममादिको
धत्वं च स्वरूपानन्दानुभव साधनमन्तः
करणं ज्ञान· ——— ·दि सिद्धमेव अ-
- तोनादिबोधे ब्रह्म, संसार निवर्तकस्य

ज्ञानस्यानादि।सिद्धत्वात् निवृत्तसंसारदो
षं श्रुतिसमृद्धमिति स्मूयते अन्यपेक्ष्यतावन
पेक्ष्यरहितत्वेन स्ववशीकृत स्वेतरसकलव
स्तुत्वं स्वातंत्र्यं- ज्ञाज्ञौ द्वावजावीशनी
शौ भोक्ताभोज्यं प्रेरितारंच मत्वा-
विद्याविद्ये ईशते यस्तु सोन्यः इत्यादिबु-
ब्रह्मणो जडाजडप्रपंच प्रेरकत्वेन स्वतंत्र
त्वं सिद्धं सर्वविषय स्वातंत्र्येण ब्रह्मणः स
र्वकर्तृत्व।सिद्धिः स्वाभाविक शक्तिमत्वं-
पूर्णशक्तिमत्वं- तथाहि श्रवणं. परास्य
शक्तिर्विविधैव स्मूयते स्वाभाविकी ज्ञान
बलक्रियाच इत्यादि चिदचित्प्रपंच रूपश
क्तिविशिष्टत्वं स्वाभाविकमेव ब्रह्मणः
कदाचिदपि न नित्य मित्यनेन।सिद्धं
अपरिच्छिन्न शक्तिविशिष्टत्वं अनन्तश
क्तित्वं अनन्ताभिरेव शक्तिभिः जनकं

श्चा सर्वं च ब्रह्म भवति तथाहि श्रूयते एक एव रु
द्रो अद्वितीयाय तस्थुः तुरीयमिमं लोक
मीशत ईशिनायु जननीयुः यः सर्वान्
लोकान् ईशत ईशानीभिः परमशक्तिभि
रित्यादि अनन्तशक्तिमत्वात् ब्रह्मणोपरि
च्छिन्न प्रपंचसमवायिकारणत्वं सिद्ध्यति
अष्टाभिधानमिति- भव शर्वेशान पशुप
VII a ति रुद्रोग्रा भीम महादेवाभिधानाष्टक
स्याधिकरणं वाच्यं परब्रह्म- अस्य सकल
शब्दवाच्यत्वेपि परमार्थबोधकत्वेन मु
ख्यतया भवादि शब्दाभिधेयत्वेन ना
न्य शब्दाभिधेयत्वप्रसंगः. सर्वत्र
सदा भवतीति भवशब्दवाच्यं ब्रह्म- भू
या तो स्वरूपार्थत्वात् सर्वत्रानुवर्तमा
नं स्वरूपं ब्रह्मेति विज्ञायते. तथा श्रुतिः
सदेव सोम्येदमग्र आसीत् एकमेवाद्वि-

तीयं सत्यं ज्ञान मनन्तं ब्रह्म, सत्यात्म प्रा
णारामं मन आनन्दं सन्म (?) इत्यादिः
सन् घटः सन् पटः इति सर्व वस्तुष्वनु
वृत्त्या सद्रूपस्य ब्रह्मणः सर्वोपादनत्वं
सिध्यति मृद्रूप रूपके घटादिकं मृद्रूपा
दान मित्यते तत स्सद्रूपं ब्रह्म भगशब्द
वाच्यं भवति। शृ हिंसायां इति धात
र्थवचनात् सकल संहृत (संहर्तृ) ब्रह्म
प्रतिपाद्यते। तस्माद्रूप संहर्ते महाग्रा
साय ते नमः यस्य च ब्रह्म च क्षत्रं च
उभे भवत ओदन इति सर्व संहर्तृ
ब्रह्म श्रूयते ... स्वाभाविक परमैश्वर्य वि
शिष्टत्वा दीशान शब्द वाच्यं ब्रह्म-
य इमां लोकानीशत ईशनी भिरिति
श्रवणात्; ईशस्य शिवत्यावे ध्यांया पशु
पति शब्दवाच्यं ब्रह्म तथा हि श्रूयते

पाशान्मोचयतीशः पशुपतिः पशूनां चतुष्पदां
अपि (उ) त च द्विपदां इत्यादि, पाशसंबं
धेन पशुत्व व्यपदेशात् पशुग्रहणात्
पशुपाशद्वयं च गृहीतं भवति- अने
न चिदचिन्नियामकं ब्रह्मेति विज्ञा
पते संसार रुक् द्रावकत्वात् रुद्रश
ब्दवाच्यं ब्रह्म भवति तरति शोकमात्म
VIII 13· विदिति श्रावणात्· परते १ जो निरन
मि भवनीयत्वात् उग्रशब्दवाच्यत्वं·
ब्रह्मणः, न तत्र सूर्यो भाति न चन्द्रता
रकमिति· श्रावणात्· नियामकत्वेन नि
खिल चेतन भयहेतुतया भीम शब्दा
भिधेयं ब्रह्म भीषास्माद्वातः पवत
इत्यादि श्रुतिः· महत्वेन दीप्यमानत
या महादेव इत्युच्यते· तथा अथर्वशि
रसि· अथ कस्मादुच्यते महादेवः

यः सर्वान् भ..वान् परित्यज्य आ......त्मा
न योगैश्वर्ये महति महीयते तस्माद्
च्यते महादेव इति निरस्त समस्त सं
सार कलङ्कतया निखिल मंगलाधार
तया शिवतत्वं यदवगम्यते तदुक्तं
स्वभावतया सकल जगज्जन्मादिकार
णं भवति तत्त्वादृश महिम्नि जगदुम
य कारणत्व संभवात् तदेतादृशं..ह
त्वात् महेत्युच्यते तदेव..शब्दवाच्यं
आनन्दादि धर्माश्रयतया सिद्धं मम
अत्र आनंदं ना म..विकल्पादि
चिन्ता निरर्थिका मायां तु प्रकृतिं
वि.. द्यादिति मायायाः प्रकृतित्वं ईश्व
रात्मिकाया एव- मायिनं तु महेश्वरमि
ति वाक्य शेषः.. सूक्ष्म चिदचिद्विशि
ष्टं ब्रह्म कारणं स्थूल सूक्ष्म चिदचि

द्विविधं कार्यं तद्भवति अतो जगज्ज
न्मादिलक्षणं ब्रह्मेति सिद्धं इति ॥

लक्षणप्रमाणाधीना हि वस्तुसिद्धिः
जगत्कारणं ब्रह्म किं प्रमाणमित्याकांक्षा
यां इत्यत आह-

॥ शास्त्रयोनित्वात् ॥

यतः शास्त्रं योनिः प्रमाणं अत
एव जगज्जन्मादिलक्षणं ब्रह्म भ
वतीति शेषः - अत जगत्कारणं
ब्रह्म शास्त्रैकगम्यं उक्तप्रमाणा
न्तरेणापि गम्यमिति सन्देहः - ज
गदिदं सावयवं कार्यमेव तच्च वैचि
त्र्य गर्भितत्वेन स्वोचितकर्तृकामि
ति कश्चित् कल्पनीयः सर्वज्ञत्वादि
मान् नासौ शास्त्रगम्य इति आ
स्मिन् शास्त्रस्य प्रामाण्यं - शास्त्रस्य

प्रमाणान्तराप्राप्तविषयत्वात् इति पूर्वः
पक्षः। सिद्धान्तस्तु जगत्कारणं ब्रह्म
वेदान्तशास्त्रैक .... मनावेदविन्मनु वे
ते तं बृहन्तं इत्यादिषु वेदान्तशास्त्र
मैतरेण ब्रह्मणो बोधासंभवश्रावणात्।
यदुक्तं सावयवत्वात्कार्यत्वसिद्धौ प्रपं
चस्य कर्ता समुचितः कल्प्य एवेत्यू
ति। तदसत् विचित्ररचनस्य गोपुर
प्रासादादेर्बहुकर्तृत्वदर्शनात्- तथा
च नानुमानेनैककर्तृत्वसिद्धिः —
व्याप्तिबलेन तस्य कर्मपारवश्यादि
प्रसंगश्च। हेतोः पक्षधर्मताबलात्
अनुमानेन जगतो विलक्षणैककर्तृत्व
सिद्धावपि निमित्तोपादानशक्तियुक्त
ककर्तृत्वसिद्धिर्नास्ति। ततो वेदान्तशास्त्रै
कगम्यं तत्प्रमाणं ब्रह्मेति सिद्धम्।

अनेन सूत्रेण पूर्वाधिकरण प्रतिपा
दित जगत्कारणत्वोपयोगि ~~ब्रह्म~~ सर्वज्ञ
त्वं ब्रह्मणः शास्त्राणां वेदानां यो
नित्वात् सिध्यतीत्यपि प्रतिपाद्यत
इति केचित्-आहुः- सूत्रस्य सूच
नात्मकस्य अर्थद्वयाभिधाने श्लेष
काव्यवत् वाक्यभेदादि दोषाभावात्
पुनरधिकरणान्तरप्रस्तावः. अस्य
स्य महतो भूतस्य निश्वसितमेतद्य
VIII 13 दृग्वेदो यजुर्वेदस्साम वेद इत्या
दि श्रूयते विषयः ब्रह्मणो वेदकर्तृत्वं
युक्तं न वेति संदेहः न युक्तमिति पूर्वः
पक्षः- वाचा विरूप नित्यये त्यादे
र्वेदो नित्यत्व प्रतिपादिकायाः श्रुताव
राधात् वेदानां ब्रह्मकार्यत्व पौरु
षयत्वा दप्रामाण्य प्रसंगाच्च तस्माद्

णो वेदकर्तृत्वानुमानमिति प्राप्ते ब्रूमः- युक्त
मेव ब्रह्मणो वेदकर्तृत्वं अस्य महतोभू
तस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वे
दस्सामवेदः इत्यादि श्रुतः निश्वसि
तवत् वेदराशेरप्रयत्नेन ब्रह्मणः प्रादु
र्भावावगमात् अष्टादशानामेतासां
विद्यानां भिन्नवर्त्मनां। आदिकर्ता कवि
स्साक्षाच्छूलपाणिरिति श्रुतेः इति
परमेश्वरस्य सकलविद्यादिकर्तृत्वप्र
तिपादनाच्च - सृष्टेः प्राक् स्वात्मनि
लीनानां वेदानां पूर्वपूर्ववर्णानुपू
र्व्य रचनया पुनः कर्ता भवति सर्व
ज्ञः परमेश्वरः अतएव वेदानां पौ
रुषेयत्वं ईश्वरकार्यत्वं च - येषां रागा
द्युपाधयस्तेषां वचनं अप्रमाणमपि भ
वति निरस्त समस्त दोष कलंकस्य

निरुपप्लव निरतिशय ज्ञान प्रत्यक्षानुभूय-
मान त्रैकालिक वस्तु विलासस्य स्वतःप्र
माणस्य परमेश्वरस्य परमाप्तस्य वा प्रका
मस्य शिवस्य ब्रह्मणो वचनं तु प्रमाण
मेव भवति. ईशान सर्वविद्यानां. स
र्वाः देवः शुभया स्मृत्या संयुनक्ति.. इति
हि परमेश्वरस्य सर्वविद्याप्रवर्तकत्वं.
~~स्मृति~~ शुभस्मृति हेतुत्वं च श्रूयते.-
अतस्सर्ववस्त्ववभासकानां वेदानां
IX. परमेश्वरकर्तृतया परमेश्वरस्य सर्व
ज्ञता निश्चीयते. अज्ञातस्य वक्तुमशक्य
त्वात्- यद्यपि सर्वगतस्य परमेश्वरस्य.
सर्व वस्तु संयोगेन सर्वज्ञत्वं सिद्ध्यति त
थापि सकलवस्त्ववभासकानां वेदानां
प्रणेतृत्वं विशेषं दर्शयति. यथा दीप.-
स्वप्रभा संयुक्तेष्वपि रूपादिषु रूपमेव

प्रकाशयति नरस्यादि तत्पात्र परमेश्वरः किं तु स्वशक्ति संयुक्तं सकलमपि प्रकाशयतीति। ननु परमेश्वरस्य सर्वज्ञत्वं नाम वेदोक्त सकल पदार्थाभिज्ञत्वं महर्षीणामपि वेदार्थवेदिनाम(मः) सर्वज्ञत्वं सिद्धं किमत्र वैषम्यमिति चेन्न। तत्कर्त्री ईश्वरस्याधिकं ज्ञानमस्ति व्याकरणादेरधिकार्थविदां हि पाणिनिप्रभृतीनां प्रणेतृत्वं दृश्यते वेदस्य सर्वार्थविभासकोपि न सर्वं मुख्यतः प्रकाशयति किं तु किमपि लक्षणया किमपि सामान्येन किमपि विशेषेण परमेश्वरस्सर्वसाक्षी सर्वं प्रत्यक्षयतीति। वेदेश्वरयोरप्ये तावद्वैषम्यमिष्यते। ननु परमेश्वरस्यैव वेदकर्तृत्वमिति न नियमः। प्रजापतिर्वै इदं सर्वं सृजत श्री। ... भूत्वा प्रजापतिरिदं सर्वं सृजत श्री.

यो यजूंषि सामानीत्यादि श्रवणात् हि
रण्यगर्भादेरपि तत्कर्तृत्वाभावमाकि तिचेन्न·
हिरण्यगर्भोत्पत्तेः प्रागपि वेदानाम्(म्)
सद्भावः श्रूयते· हि · यो ब्रह्माणम(म्) वि
दधाति पूर्वम(म्) यो वै वेदांश्च प्रहि
णोति तस्मा इति· यस्सर्व देवानामादि
मस्य हिरण्यगर्भस्यापि कर्ता तस्मै सर्वा
IX 13 न्वेदांश्च नुपदिशति· स एव सर्वाधिको
वेदकर्ता· परमं दर्शकः · तथा हि श्रुत्या
भिव्यज्यते; यो देवानां प्रथमं पुरस्तात्
विश्वाधिको महर्षि हिरण्यगर्भं पश्यत
जायमानं स नो देवः शुभया स्मृत्या सं
युनक्ति· महर्षि वेदकर्ता यः सर्वज्ञता
दीनां विश्वस्मात्किंचित्प्रपंचात् अधि
को रुद्रः परब्रह्मभूतः सर्वेषां देवानामि
न्द्रादीनां प्रथममादिमं हिरण्यगर्भं

ब्रह्मणः स्वसंकल्पेन प्रकृतिरूपादात्मनो जायमानं सृष्टिकाले सर्वज्ञानोपाय सकल वेदोपदेशरूपया नुग्राहदृष्ट्या पश्यन् परमकारुणिकः न अस्मानपि सकल संसारपाश महानर्तु निवृत्ति हेतुभूतया परमामृतलक्ष्मी समावेश परमानन्द प्रा धिकारिण्या अतएव परममंगलरूपया वेदांत सार सामरस्य सिद्धतया स्मृत्या बोधकलया स्वविषयया संयोजयन्ति त्नि (त्वि) ति तात्पर्यं अतस्सकल वेद कर्तृत्वमीश्वरस्य सिद्धं - वाचो नित्य त्व श्रुति रीश्वरेण पूर्वसत्तानुवृत्त्याविहितत्वात् वेदान् मविरुद्धा - ततोवेदाना मीश्वर प्रणीतत्व म(म्) नित्यत्वं चाविरुद्धमेव - प्रथमाधिकरणे जिज्ञास्यतया प्रतिपादितस्य परब्रह्मणश्शि

तस्य परिज्ञाने लक्षणापेक्षायां द्वितीयाधिकरणेन लक्षणं जगज्जन्मादिरूपमभिहितं तस्मिन् किं प्रमाणमित्याकांक्षायां तृतीयाधिकरणेन वेदांतशास्त्रं (?) स्य प्रामाण्यम(न्य) त मूलत्वं च ... निरूपितं येन यद्द्रव्यमिचारेण सिद्ध्यति तद्धि तस्य प्रमाणमुच्यते वेदांतवाक्यानाम(म्) कथं ब्रह्मबोधकत्वमित्याकांक्षायां चतुर्थाधिकरणमवतार्यते —

॥ तत्तु समन्वयात् ॥

तच्छब्देन प्रकृतं ब्रह्म परामृश्यते. तु शब्देन सर्वाणि वेदांत वाक्यानि समाहियंते समन्वय शब्देन तात्पर्येण संबंध उच्यते. तद्ब्रह्म वेदांतवाक्यानि तात्पर्य लिङ्ग संबन्धात् साधयन्तीति सूत्रार्थः — अस्य सर्वाणि वेदांतवाक्यानि

विषयः वेदेतवाक्यानां कृह्मबोधकत्वं युक्तं न
वेति सन्देहः सर्वत्र संबन्धग्रहणापेक्षं
शब्दस्यार्थावबोधकत्वं - शब्दार्थयोस्सं
बन्धज्ञानमन्तरेण हि पुरुषस्य शब्दा
र्थप्रत्ययो न भवति संबन्धज्ञानं च वृ
द्धव्यवहारसापेक्षं व्यवहारस्य का-
र्यैकगोचरः . तथाहि गामानय ग्राम(म्)
वा ध्वनेति वृद्धवाक्यश्रावणसमनन्त
रं प्रवर्तमानं प्रयोज्यमवगम्य बा-ल्यो
व्युत्पित्सुरेवमवधारयति सर्वथायं
कार्यावगति समनन्तरमेव प्रवर्तते सा
च कार्यावगतिरेतस्मादेव वाक्यात्
समुत्पद्यते अन्यथा कथमस्यैतद्वाक्य
श्रावणसमनन्तरं प्रवृत्तिरिति पुनर्भू(र्त) गा
वानयनबन्धनदर्शनात् कार्यवि
शेषं निश्चिनोति . तदेवं कार्यार्थत्वात्

X 13· त्वत्ते [illegible] व न सिद्धे ब्रह्मणि शब्दस्यप्रामा
ण्यम(म्) किं प्रेत्कार्यविशेषत्वात् अयातः
कर्तृविशेषस्य ब्रह्मणो नुमानादिनापि सि
द्धे कथमस्मिन्न प्राप्तविषयाणां वेदांत
वाक्यानां प्रामाण्यं - अथवा विधिपराण्ये
व वेदांतवाक्यानि [illegible] ब्रह्मपराणि उभ
यपरत्वे वाक्यभेदः स्यात् अतो वेदांतवा
क्यानां न ब्रह्मसाधकत्वं युक्तमिति पूर्वः-
पक्षः युक्तमिति सिद्धांतः वेदांतवा
क्यानां तात्पर्यलिङ्ग. समन्वयेन ब्रह्मबो
धन समर्थत्वात् यदुक्तं कार्यार्थ एव व्युत्प
त्तेर्न सिद्धे ब्रह्मणि शब्दस्यप्रामाण्यमिति·
तदसत्. पुत्रः जात इत्यादिषु सिद्धा
र्थेष्वपि वाक्येषु संबन्धग्रहण दर्शना
त्. वृद्धव्यवहारेपि दृष्टं. स्वस्य
प्रवृत्ति हेतुभूतायाः कार्यावगतेः पदा-

था। ज्ञान पूर्वत्वावगमात् प्रयोज्यवृद्धस्य प्रयोजक वाक्यं पदार्थज्ञानमुत्पादयतीति निश्चिनोति. अतस्सिद्धार्थेष्वपि शब्दस्याभिधान निश्चयः - अथवा किमिह वृद्धव्यवहारेण व्युत्पत्तेः प्रकारान्तरेणापि सिद्धत्वात् तथाहि बाल मातादिभि इदमिति पश्य प्रभृती नर्थान् अंगुल्या निर्दिश्य तत्तच्छब्दो स्तेष्वर्थेषु प्रयुज्यन्ते बहुशः शिक्षिताः तेषु तेष्वर्थेषु व्युत्पद्यते - काव्य नाटकानभिज्ञाः पुरुषा स्तदभिज्ञपुरुषसमीपमेत्य पदविच्छेदं कृत्वास्य शब्दस्यायमर्थ इति. सर्वशब्दानामर्थमवगच्छन्ति एवं अतस्सिद्धार्थेपि व्युत्पत्ति संभवात् तत्त शब्दस्य प्रामाण्यमस्ति ततो वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं; यदुक्तं जगतः कार्यविशेषत्वात् कर्तृविशेषस्य

ब्रह्मणोऽनुमानादपि सिद्धिरिति तन्न सम्भ
वति– विचित्ररचनस्य रथप्रासादादेर
नेककर्तृत्वदर्शनात् अनुमानेनास्य जग
तः एककर्तृत्वसाधनायोगा स्य व्या
प्तिबलात्कर्मवदृष्टत्वादीनां कर्तरि प्राप्तेश्च
पूर्वोक्ततया नानुमानगम्यं ब्रह्म किञ्च
श्रुत्यानुगुण्यादनुमानमपि ब्रह्मणि प्रमा
णं भवतु नाम यत्तवाक्यानां तात्पर्यं तत्र
हि तेषां प्रामाण्यं न प्रत्यक्षादीनामिव
सार्वत्रः वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनि
र्णायकानि कानि लिङ्गानि इति चेदुच्यते तत्र
उपक्रमादीनि तथा पठन्ति उपक्रमोपसं
हारावभ्यासोऽपूर्वता फलम्। अर्थवादो
पपत्तीच लिङ्गं तात्पर्यनिर्णये॥ इति त
दिहोपक्रमादिभिर्लिङ्गैः वेदान्तवाक्यानां ब्रह्म
णि तात्पर्यं निर्णीयते– य उपक्रमादिभिः

~~तु~~-तात्पर्यनिरूपणञ्च तदेव वेदान्तवा
क्यानां श्रवणमित्युच्यते तदप्युच्यते
अज्ञानप्रभवं दुःखम(म्) ज्ञानं तस्य निवर्तकम् ।
सर्ववेदान्तवाक्यानां श्रवणं तत्प्रवर्तकम् ॥
श्रवणं नाम वाक्यानां वैदिकानां परात्परे ।
उपक्रमादिभिर्लिङ्गैः शिवे तात्पर्यनिर्णयः ॥
इति उपक्रमोपसंहारादिकलिङ्गैः वेदा
न्तवाक्यानां ब्रह्मणि शिवे तात्पर्यनिर्णयः
XI 13 तत्र तात्पर्यं नाम तत्स्वरूपप्र
मिति शेषः । उपक्रमोपसंहारौ सदेव
सोम्येदमग्र आसीदिति उपक्रमः तत्
त्वमसीति उपसंहारः धातुः प्रसादान्महि
मानमीश इत्युपक्रमः पश्यत्यस्य महेश्व
र इत्युपसंहारः एवमन्यत्रापि द्रष्टव्यं
तत्त्वमसि सर्वो वै रुद्रः ॐ अम्बिकापतय उ
मापतय उमापतये यो वै रुद्रः स भगवान्

भूर्भुवस्स्वरित्यभ्यासः अपूर्वता वेदे
तत्र प्रमाणं, प्रतं - फलं ब्रह्मज्ञानं - अर्थवादो
जगत्सृष्टिस्थिति प्रध्वंसादयः उपपत्ति-
र्विरोधाभावः सर्वज्ञानादिसंपत्तिर्वा
एतैर्लिङ्गैः ब्रह्मणो तात्पर्यमवगन्तव्यं वे
दान्तवाक्यानां - न केवलं ब्रह्मपरा वेदा
न्ता किंतु आत्मावा अरे द्रष्टव्य इत्यादिषु
तज्ज्ञान (तज्ज्ञान) विधिपरा अपि ज्ञा
यन्ते. उभयपरत्वे वाक्यभेदप्रसङ्गः इति
यदुक्तं तन्न रूपप्रत्यायकेन चक्षुषा य
था द्रव्यस्यापि सिद्धिः तथा विधिपरैरपि
वेदान्तैः ब्रह्मसिद्धिरिति नोभयपरत्वे विरो
धः - ब्रह्मशाब्दज्ञानं... तद्ब्रह्मवाचिशब्दादे
व प्राप्तं तद्विधिना किं प्रयोजनमिति चे
त्र प्राप्तावपि मन्त्रादिष्विव विधेरत्वे
रोधः यथा द्रव्यदेवतादिप्रकाशकेषु मं.

तेषु श्रूयमाणेषु इत्यादि ज्ञाने ज्ञातेपि पुनर
नुष्ठानकाले मंत्रैरनुस्मर्तव्यमिति प्र
योगविधि ज्ञानानन्तरमनुष्ठापयति
तथात्रापि । नचोत्पत्तिविनियोगाधि
कारविधीनामभावात् प्रयोगविध्यसं
XII A भवइति शंकनीयं । उत्पत्ति वि० १ रधि
कारेणासिद्धौ प्रकरणवशात् शमादीन्
विनियोजयन् आत्मानं पश्येदिति
विनियोगविधिरुपपद्यते ततश्च शान्तस
तन्यायेन ज्ञात्वा देवं मुच्यते सर्वपाशै
रित्याद्यर्थवादावगत मोक्षकामोधि
कारी कल्पनीयो भवति अतो मोक्षकामः
शमादियुक्तो ब्रह्मज्ञानं संपादयेदिति प्र
योगविधिलाभः । ननु ब्रह्मज्ञानस्य
विधेयत्वमनुपपन्नं आत्मा वा अरे द्र
ष्टव्य इत्यादौ नित्ये ब्रह्मणि निर्विकारे

विशुद्धे चात्मनि हि न कर्मकारकमपि युज्यते येन विधिसंभवः उत्पत्ति प्राप्ति विकार संस्काराणामसंभवा न्न च स्वतन्त्रफलाय "सक्तु न्यायेन" कर्मकारकतामपि रित्यज्य कारणत्व परिणामेनात्मनः पश्येदिति विधातुं शक्यं वैषम्यात्. तथा हि क्रियाकृता तिशयस्य भस्मीभावलक्षणस्य सक्तुषु संभवात्तेषु शब्दतः करणत्वे पि -(वे) अर्थतः कर्मत्वमस्ति न तस्यात्मनि संभवः अतो वेदान्तानां ब्रह्मज्ञान विधि परत्वमिति चेन्न - आत्मनि कर्मत्वप यश्यापि त्यस्यापि भावे कर्तृस्य मोक्ष फलाय विध्युपपत्तेः प्राप्ते कथं विधिरिति चेद्विः प्राप्तिः प्राप्तिकीनित्यापि उद्भवं यथा विनिमयादि विधिस्संभवति.

ननु तथासति वेदांतानां विधिपरत्वे
न ब्रह्मपरत्वमनुपपन्नं- यदुक्तं स्व
प्रत्यायकेन चक्षुषा द्रव्यसिद्धिवत् वि
धिपरैरपि वेदांतैः ब्रह्मसिद्धिरिति तदयु
क्तं चक्षुर्हि संयोगेऽपि निरपेक्षमेव
XIII 13: ....त्ति वस्तु प्रमाणं न तथा शब्दः किंतु
यत्तात्पर्यं तत्प्रमाणं तस्माद्वेदांतानां ब्र
ह्मप्रमापकत्वं ब्रह्मज्ञानविधायकत्वं च न
संभवतीति चेन्न समिधो यजतीत्या
दीनां वाक्यानां पंचप्रयाज विधायक
त्वं स.. नुष्ठानक्रम विधायकत्वं चेत्यु
भयपरत्व दर्शनात्- वेदांत वाक्याना
मपि ब्रह्मप्रमापकत्वं मोक्षज्ञानं मोक्षो
पकारकं प्रति विधायकत्वं च युक्तमेव.
ननु ब्रह्मणि वाक्यादेव ज्ञाते तद्ज्ञानवि
धिरप्रयोजनः तत्प्रयोजनस्य पूर्वज्ञा

नाऽस्य देव संभवादिति चेन्न वाक्येन परोक्षत्वेन ज्ञाते ब्रह्मणि तत्साक्षात्काराय ज्ञानविध्येरुपपत्तेः - कथं भेद इति चेत् वाक्यजन्यम(म्) न तत्साक्षात्कारहेतुः किंतु प. सनाख्य-ज्ञानमेव - तथा श्रूयते ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्त साक्षिं तमसः परस्तात् ज्ञान निर्मथनादेव पाशं दहति पंडित इत्यादिषु ज्ञात्वा देवं मुच्यते सर्वपाशैः ये विदुस्ते ज्ञात्वामृता भवन्तीत्यादिषु च - तथा हि - श्रोतव्यः श्रुति वाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। ज्ञात्वा च सततं ध्यातव्य एते दर्शनहेतवः। इत्यत्र श्रवणमनन संपन्न ज्ञानविनाभूतं निदिध्यासनं ब्रह्मण स्साक्षात्कारे स्मर्यते अत उपासनारूप ज्ञानं मोक्षफलं विधीयते आत्मन्येवात्मानं पश्ये

त्र शं मुखाकाशमध्ये: य: तज्जलानिति शा
न्त उपासीत इति प्राचीनयोग्योपास्ते त्या
दिषु च तथा ब्रह्मविदाप्नोति परमित्यादि
१५. षु ब्रह्मस्वरूपोपासनायां तत्फल
लादिकमुपदिश्यते - अन्यथा सत्यत्वा
दि विशिष्ट ब्रह्मणा सह कथं सकलकामा
वाप्ति: फलं तादृश ब्रह्म साक्षात्कारं च
ति सिद्ध्यति । तस्मात्सत्यं ज्ञानमनन्तं
ब्रह्म आनन्दो ब्रह्म आकाशशरीरं ब्र
ह्म सत्यात्म प्राणारामं मन आनन्दं
शांतिसमृद्धं अमृतं ऋतं सत्यं परं ब्र
ह्म पुरुषं कृष्णपिङ्गलमूर्ध्वरेतं विरूपा
क्षमिति सत्यज्ञानानन्तरूपं स्वा
त्मारामं उपशांत सकलोपप्लव कलंकं
सकल मंगलात्मकं परमशांकरया विना
न्तरतया शब्दरूपत्वेन कृष्णपिंगलं

मू. विरूपाक्षं त्रिलोचनं ब्रह्म उपक्रमा
दि तात्पर्य लिङ्गैः निरूप्यते. यो वेद निहि
तं गुहायां परमे व्योमन्. इति प्राचीन
योग्योपास्येति ज्ञानाविनाभूतं तदुपा
सनं च विधीयते. सर्वान् कामान् इत्या
दिषु सकलकामावाप्ति ब्रह्मणा सहोपा
सकानां अवगम्यते. अतो निष्काम नि
जधर्मो वैतो निषिद्धकाम्यधर्मरहितो
य थाश्रुति स्मृति चोदितकर्मानुष्ठानसंप
न्न चित्तशुद्धि शमाद्यनुगृहीत परमशि
व भक्ति भावित एवं मुमुक्षुः श्रुति सारेभ्यः
शिवाभिधेयं परं विदित्वा तदुपासीतेति.
ज्ञानोपासना विधिरुपपन्नः. अत्र शिव
पद ग्रहणं विरूपाक्षस्य परब्रह्मणः प
रम शुद्धि मंगळभाजनत्वात् मुमुक्षूणामु
पासनैक विषयत्वद्योतनीयं तथाच

र्वशिखायां शिव एको ध्येयः शिवङ्क
१४३ रः सर्वमन्यत्परित्यज्येति श्रू
यते- शिवशब्दवाच्यस्य वस्तुन एव
ध्येयत्वमिति अन्यथा कथं संसारनिवृ
त्तिः निरस्तसमस्तशोकपङ्कनिरतिशे
शय मंगलाकारत्वं हि शिवत्वं यत्तु ज्ञाना
न्मोक्षरूपं फलमुच्यते - यदा चर्मवदा
काशं वेष्ट इ(यि)ष्यन्ति मानवाः - तदा
शिवमविज्ञाय दुःखस्यान्तो भविष्यती
ति · शिव एको ध्येयश्शिवङ्करः सर्वम
न्यत्परित्यज्येति शिवव्यतिरिक्तस्य मु
मुक्षूणां ध्येयत्वं परिसंख्यायते · अतः
शिव एव परं ब्रह्म मोक्षकामैर्ध्यात
व्यो वीतव्य इति - अतस्तात्पर्यलिङ्ग
समन्वयेन ब्रह्मपरा वेदान्ता तदुपासन
विधिपराश्चेत्यविरोधः - उक्तस्य

कर्तृलक्षणस्य प्रधाने अतिव्याप्तिमाशङ्क्या
ह: -

॥ ईक्षतेर्नाशब्दम् ॥

छान्दोग्ये श्रूयते स्य विषयः - सदेव सो-
-म्येदमग्र आसीत् एकमेवाद्वितीयं तद्
ऐक्षत बहु स्यां प्रजायेयेतीत्यादि - इह
पूर्वभावितया सकलस्य प्रपञ्चस्य कार
णत्वेन श्रूयमाणं सदिति वस्तु ब्रह्म वा प्र
धानं वेति संदेहः प्रधानस्यैव जग-
त्कारणत्वं युक्तं अजामेकां लोहितशु
क्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपामे
ति श्रुत्यन्तरे श्रवणात् - अतएव बहुप्र
जाजनकत्वं लोहितादि वर्णानुमित रज
स्सत्त्व तमोरूपायाः साङ्ख्यप्रकृतेरेव
गम्यते तदानुगुण्येन तापि सच्छब्दवा
च्यं जगत्कारणं प्रधानमेव - रजस्सत्त्व

१९A:- योगाद्रूस्य क्रियाज्ञानशक्तिसं १ न्धोऽपि
युज्यते येन जगत्कारणा अ (य.) सि
द्धिः - अचेतनस्य प्रधानस्य जगदाका
र परिणामो युक्तः नचेतनस्य परमेश्व
रस्य कूटस्थस्य - कारण विकृतिरू
पत्वात् परिणामस्य ततोऽन्यायतः श्रुत्या
य प्रधानमेव जगत्कारणम (म्) सत्प
दवाच्यमिति प्राप्ते ब्रूमः . अशब्दमानु
मानिकं प्रधानं न जगत्कारणं सत्पदवा
च्यं वस्तु - अपितु ब्रह्मैव चेतनं . ईक्ष
ति श्रवणात् तदैक्षत बहुस्यां प्रजाये
येति नह्यचेतने ईक्षातेस्सं भवति .
यदुक्तं बह्वीं प्रजां जनयन्तीमिति श्र
वणात् सीरूप्य प्रकृतेरत्र जगत्कारण
त्वमिति तदसंगतं . चमसवद्विशेषा
दिति सूत्रे हि परमेश्वर कारणे काया

च प्रकृते र्ब्रह्म प्रजा जनकत्वमिति उपपादयि
ष्यामः - रजस्सत्वरूपतया क्रियाज्ञान
शक्ति संबन्धः प्रधानस्येति यदुक्तं तदयुक्तं
त्रिगुणात्मिकायाः प्रकृतेः तमःप्राधान्ये
न रजस्सत्वयोरभावात् - तस्मिन्न्यक्
भूते रजस्सत्वयोरुद्रेके ज्ञानक्रियासं
बन्धः प्रधानस्येति नवाच्यं - सत्व
रजस्तमसां साम्यावस्था प्रकृतिरित्यं
गीकारात् कूटस्थस्य परमेश्वरस्य ज
गदाकारेण परिणामो विकरणे हेतुरि
ति यदभाणि तदज्ञानविलसितं नाम
रूपविभागानर्ह सूक्ष्मचिदचिच्छक्ति
विशिष्टस्य परमेश्वरस्य कारणत्वं - ना
मरूपविभागार्ह स्थूलचिदचिच्छक्ति
विशिष्टस्य कार्यत्वमिति वदतां अस्माकं
१९.13 तत्प्रसंग(म)स्याभावात् —

ननु सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमित्यादिना सद्रूपं वस्तु निर्विशेषमेवावधारणात् अवगम्यते कारणावस्थमेतत्कर्मं सूक्ष्म प्रपंच विशिष्टमित्युच्यते इति चेत् न सदेवेत्यवधारणेन नविशेष निषेधः- किन्तु सत्कारणत्व निषेधः असद्वा इदमग्र आसीत् ततो वै सदजायतेति श्रावणात् असत्कारणत्वस्य प्राप्ते प्रसक्ते सत्वात् किंच सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमित्यत्र कर्मानिर्विशेषत्वं ब्रह्मणः आसीदिति हि क्रिया विशेषः अग्र इति कालविशेषः एकमेवेत्यवधारणं आध्येकातंतर निषेध परं अद्वितीय[illegible]: जगदुपादानत्वमुच्यते. अतएव सर्वज्ञं अनन्त शक्तिक विशेषैर्च - कर्मं सर्वज्ञत्व सर्वशक्तित्व विशेष

मन्तरेण जगदुभयकारणत्वं ब्रह्मणो भवति अथवा प्रकृति प्रत्ययात्मा. कस्य सत्पद स्या नेकवस्तुपरत्वं म युक्तं - प्रकृत्या प्र त्ययेनचं सत्पदस्य वस्तुद्वय प्रतिपाद नपरत्वात् - तथा हि प्रुक्तं सूक्तेः -

शक्तिविशिष्टं सच्छब्द प्रकृति प्रत्ययोदितौ। तौ ब्रह्म सामरस्येन समस्त जगदात्मकौ॥इ ति· स्थूल सूक्ष्म चिदचित्प्रपंच रूप शक्तिविशिष्ट परमेश्वर एव कार्यकारणरूपः सत्पद विषय इति निर्णयः— पुनरा शङ्कय परिहरति -

॥ गौणश्चेन्नात्म शब्दात् ॥·

इक्षते श्चेतन धर्मस्याचेतने प्रधा ने योगाभावात् चेतनमेव परं ब्रह्म स

१६·A त्पदवाच्यं कारणमि·ति प्रतिपादितं तद सङ्गतं· तत्तेज ऐक्षत ता.प. ऐक्षंत इत्या

द्विषु चेतने ऽपि ईक्षतिः ऽर्थं च गौणः श्रूयते-
तथा प्रधाने ऽपि गौण इति चेन्न - चे-
तन वाचिन आत्म शब्दात्. सदेव सो-
म्येदमग्र आसीदिति आरभ्य उपसंहारे
स आत्मा तत्त्वमसीति श्रावणात्. तेजः-
-प्रभृतिष्वपि न गौण मीक्षति श्रावणं
तत्तदात्मतया परमेश्वरस्य चेतनस्यानु
वृत्तेः - नन्वीक्षति श्रावण मभ्युपेत्य
गौण मप्यचेतनं प्रधानं सकलं जग
तः कारण मिति वक्तु मशक्यं. तस्य चे
तनत्व वादिन आत्म शब्दादिति नि नि.
पितं. भवतु न आत्मशब्दस्या चेतनं
प्रधानं मु.(अ)र्थ इति. भवति तु चेत
नस्य जीवस्यात्म शब्द वाच्यत्वं मु
ख्यं ततो जीव एव चेतनो जगत्कारण..
सद्रूप मित्यत आह—

॥ तन्निष्ठस्य मोक्षोपदेशात् ॥

सत्पदवाच्य तत्वनिष्ठस्य मोक्ष उपदिश्यते तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये तस्मान्न प्रधानं जीवक्लात सत्पद विषयः - प्रधानकारणवादिना मपि तन्निष्ठस्य मोक्षो नाभिमतः त्याज्य त्वात् नच जीव निष्ठस्य, निषेधात्, शिव एको ध्येयः शिवंकरः सर्वमन्यत्प रित्यज्येति: पुनरपि स्पष्ट हेतुमाह- प्रधान निराकरणे- -

॥ हेयत्ववचनाच्च ॥

यदि प्रधानमेवात्त विवक्षितं तर्हि तस्य हेयत्वमेवोच्येत - तत्त्वमसीति मोक्षहेतु तया ध्येयत्वमुच्यते ततोन प्रधानमिति 1.1.8 उक्तं - किंच प्रधानपक्षे विरोध इत्याह

॥ प्रतिज्ञाविरोधात् ॥

इतश्च न प्रधानं सत्पदवाच्यं एकविज्ञाने
न सर्व [struck] विज्ञान प्रतिज्ञा विरोधात्-
सत्पदवाच्य तत्त्वज्ञानेन तत्कार्यतया स
कलचेतनाचेतनवस्तु विज्ञातं भवतीति
येनाश्रुतं श्रुतं भवतीत्यादिना प्रति
ज्ञायते॰ प्रधानकारणत्वे विरुद्धमेतत्
चेतनस्य प्रधानकारणत्वायोगात्-प्र
धाने कारणे ज्ञाते जाड्यविकारास्पदं त
त्कार्यमिदं सर्वं ज्ञायते॰ यथा मृदिज्ञा
तायां तत्कार्यं घटादिकं; अतः कोत्र
विरोध इत्याशङ्क्याह-

॥ स्वाप्ययात् ॥

इतश्च न प्रधानं- स्वप्नान्तं मे सौम्य
विजानीहि यत्रैतत्पुरुषः स्वपिति नाम
तदा सौम्य सता संपन्नो भवति स्वं
पीतो भवति तस्मादेनं स्वपितीत्या

चक्ष्यते। इति। जीवस्य चेतनस्य सकाशे पन्नस्य स्वाप्ययवचनात् - स्वाप्ययः प्रलयः अचेतने प्रधाने चेतनस्य लयो नयुक्तः ततो न प्रधानं 'प्र.' 'प्र.' स दित्युच्यते; सच्छब्देन परमेश्वर एव प्रतिपाद्यते न प्रधान मित्याह-

॥ गतिसामान्यात् ॥

यथास्यामुपनिषदि सत्पदस्य परमेश्वरवाचित्वेन गतिः कृता श्रुत्यन्तरेपि समाना। पुरुषो वै रुद्रः स न्महो-नमो नमः इत्यादौ अतस्सत्पदवाच्यः परमेश्वरः - व्यक्तमेवास्यामुपनिषदि आत्मनः स्सर्वोत्पत्तिः श्रूयत इत्याह-

॥ श्रुतत्वाच्च ॥

अतो व्यात्मनः प्राण आत्मनः आशा

इत्यारभ्यात्मन एवेदं सर्वमिति श्रूयते-
१८अ. तथा तौ जगत्कारणत्वेन सत्पदवाच्यत्व
मैव न प्रधानमिति सिद्धं- इहब्रह्म
लक्षणस्य जगत्कारणत्वस्य शास्त्रैकसम
धिगम्यस्य तीतिके प्रधाने तिव्याप्तिमाश
ङ्क्य चेतनत्वादिहेतुना यथा तस्मिन्न
तिव्याप्तिर्न भवति तथा निरूपितं-
अचेतने प्रधान इव चेतनेपि जीवे ऽ-
तन्नातिव्याप्तमिति वक्तुमधिकरणा
न्तरमारभ्यते-.

॥ आनन्दमयोऽभ्यासात्॥

तस्माद्वा एतस्मादात्मन आकाशस्सं
भूत इत्यारभ्य तस्माद्वा एतस्माद्विज्ञान
मयादन्योऽन्तर आत्मानन्दमय इति क
थित आकाशादि सर्वभूतकारणत्वेना
न्नमयादिकोशकंचुकान्तरस्थ आत्मा-

-नन्दमय इति· आनन्दवल्ल्यामाम्नाय
ते· अत्रानन्दमय आत्मा जीवो वा परमे
श्वरो वेति संदेहः जीव इति पूर्वःपक्षः
तद्धर्मोणां मत्तो वलं भात्:· तस्माद्धि· पृ
थिव्या ओषधयः ओषधीभ्योन्नम(न्नं)
अन्नात्पुरुष इत्यादिना पंचावयवं शरी
रादिकं निरूप्यते· अत्रान्नमय इति शरी
रमुच्यते प्राण इति तदंतर्वर्ती प्राणः मनो
मय इति तदंतर्वर्ती मनः विज्ञानमय इति·
तदंतर्वर्तिनी बुद्धिः आनन्दमय इति सर्वे
षामन्नमयादीनां माम्नायो जीव एव- अ
न्नादीनां शिरःप्रभृति कल्पना समुपास
नार्था· अन्नादीनां ब्रह्मत्वेनोपासनात्त
त् दन्नादि समृद्धिः फलं· कथमस्य संसा
र दुःखमग्नस्य जीवस्य आनन्दमयत्वा·
भिधानमिति चेत्:· अत्रानन्दशब्देन प

रं ब्रह्मोच्यते· आनन्दो ब्रह्मेति श्रवणात् म
१८३· यट्, ं शब्दस्य विकारार्थत्वात् कार्यभूतो
जीव एव आनन्दमय इत्युच्यते· नित्य
संपन्न जीवत्वस्य ब्रह्मण आनन्दमय इ
त्यंगीकारे अन्नमय प्राणमय मनोमय वि
ज्ञानमयानन्दमया मे शुध्यंतामिति· शुद्धि
प्रार्थना व्यर्था स्यात्- अतोयमानन्दम
य आत्मा जीव एव न परमेश्वर इति प्रा
प्ते ब्रूमः- आनन्दमयोयमात्मा परमे
श्वर इति कुतः तस्यानन्दस्य निरतिश
यत्वेनाभ्यासात् कथमभ्यस्यते सै
षानन्दस्य मीमांसा भवतीत्यारभ्य मा
नुष विशेषादि प्रजापति पर्यंतं तत्तदा
नन्दस्य उपर्युपरि शतगुणमतिशयमभि
धाय स एको ब्रह्मण आनन्द इति·
ब्रह्मानन्दो निरतिशयत्वेनाभ्यस्यते·

तदेतान्निरतिशयानन्दभाजनत्वमस्य सं
सारिणो न संभवति। यदुक्तमानन्दमय
स्येश्वरत्वे नित्यशुद्धस्य तस्य कथमपि
शुद्धिप्राप्त्येति। तत्रेदमुत्तरं। यथाप
कृष्टप्रकाशस्य चन्द्रस्य तिरोधायकघना
पगमे एव प्रसादः तथा तस्य नित्यशु
द्धस्य तिरोधानमलापनयनमेव शु
द्धिः तस्मादानन्दमयः परमेश्वर एव।
ननु ब्रह्मानन्द एव ब्रह्मेत्युच्यते तद्विकारः
आनन्दमयः मयटो विकारार्थत्वात् -
आनन्दमयस्येश्वरत्वाभ्युपगमे ब्रह्मणोन्य
ईश्वर इति प्राप्नोति। तथा सति तस्य विका
ररूपत्वात् अनित्यत्वं चेति शङ्कायामाह।
॥ विकारशब्दान्नेति चेन्न प्राचु
र्यात् ॥-
१४A. अन्नमयादीनां यथान्नाद्याद्विकि

रान्यत्वं तस्मात् आनन्दमय इति आन
न्द विकारः - मृत्तिकारो हि - मृन्मयो घटादिः
अतः परमेश्वरस्य विकारत्वासंभवात् अर्थजी
व एवेति चेन्न: मयट् शब्दस्य प्राचुर्यार्थ
त्वात् अन्नमय प्राणमय मनोमय पर्यंतमे
व मयड्विकारार्थः - विज्ञानमयो विज्ञानप्रचु
रो जीवः आनन्दमयोप्यानन्द प्रचुरः प
रमेश्वरः. सर्वेषां विकार प्रकरण पठित
त्वात् विकारार्थ एव समुचितो मयट् श
ब्द स्येत्याशङ्क्याह —

॥ तद्धेतु व्यपदेशाच्च ॥

एष ह्येवानन्दयाती ति जीवान्प्रत्यानन्द
हेतुतयानन्दमयः श्रूयते स्वयं प्रचुरानन्दो
हि परानानन्दयति अतः परमेश्वर एवानन्द
मयः प्रचुरः परमेश्वरः आनन्दमय इत्यु
क्तेऽपि ब्रह्मणोन्य एवायमिति गम्यते . ब्रह्म

च्छं प्रतिष्ठेति ब्रह्माधारत्वेन स्यावगमात्
परमेश्वराद्यंताङ्गीकारे ब्रह्मणोऽस्वात
न्त्यात् जगत्कारणत्वासंभवः अतोऽजी
वपक्ष एव समीचीन इत्यत आह--
॥ मान्त्रवर्णिकमेव च गीयते॥
यत्सत्यं ज्ञानमानन्दं ब्रह्मेति मन्त्रवर्णोदि
तं ब्रह्म तदेवान्योऽन्तर आत्मानन्दमय इति
आनन्दप्रचुरतया आनन्दम[illegible] इति गी
यते ब्रह्मपुच्छं प्रतिष्ठेति ब्रह्मशब्दः प्र
णववाचकः तस्य परमेश्वरवाचकत्वा
दाधारत्व - अतएके चिदाहुः परमाकाश
रूपः प्रकृत्यात्मानन्दमय इति श्रूयते
नाविश्वाधिकं निमित्तं परं ब्रह्म यत्सत्यं ज्ञा
१८.13 नमानन्दं ब्रह्मे तु. १ त्यत्र तस्माद्वा एत
स्मा~~द्वा आकाश~~ दात्मन आकाशः संभू
तः इत्याकाशादिप्रपञ्च प्रकृतित्वेन ब्र

त आनन्दमयः परमाकाशः परमाका
शरूपत्वं मस्य यदेष आकाश आनन्दो
न स्यादित्यतो वगम्यते ब्रह्मपुच्छं
ब्रह्म तिष्ठति ब्रह्मानन्दाकाशस्याधार
त्वेनावगम्यते अतएव सएको ब्रह्मण
आनन्द इति ब्रह्माश्रितत्वेनावगम्यते -
पुनरेव वर्वानन्दो ब्रह्मेति व्यजानात् -
आनन्दाद्ध्येव खल्विमानि भूतानि
जायन्ते इत्यादिना सकलभूतप्रकृतित्वे
~~नाभिधीयसे~~ नाभिधीयते तत आनन्दो
ब्रह्मेति आनन्दस्य ब्रह्म व्यपदेशस्तु ब्र
ह्मधर्मत्वेन तदभेदात् सैषा भार्गवी
~~विद्या~~ वारुणी विद्या परमे व्योमन्प्र
तिष्ठितेति ब्रह्मधर्मस्वरूपे परमानन्द
रूपे प्रपञ्चप्रकृतौ परमशक्तिपर्या
ये चिदात्मनि परमे व्योम्नि वारुणी

विद्या समाप्तेत्युच्यते- ततो ब्रह्म धर्मस्व
भावः प्रकृत्यात्मा परमात्मरूपा श
क्तिरानन्दमय इत्युच्यते तद्धर्मित्वेन-
प्रतिष्ठेत्युच्यते परब्रह्म, विज्ञानमय.
स्तदुपासको जीवः, प्रतिष्ठाभूतात्ध
र्मिणो ब्रह्मणो धर्मभूतस्यानन्दमय
स्य शक्त्यात्मनो भेदादर्शनादानन्द
मय आत्मा इत्यभिप्रायेण आनन्द
मयोभ्यासादिति सूत्रकारेण सूक्त
मिति- अन्ये पुनरस्माल्लोकात्प्रेत्य, प
तमन्नमयमात्मानमुपसंक्रम्येत्या
दीनां प्रत्येकं चेतनवाचकात्मश्रुति
संबन्धात् संसारलोकादुत्क्रान्तस्य
मुक्तस्य क्रम प्राप्यत्वावगमात् इमे
सर्वेऽप्यन्नमयादय आत्मानः पञ्च चे
११.A तना अन्नाद्यनुमितं तत् पञ्चभूताधिष्ठातारः

कारणभूताः पुरुषाः - ब्रह्मविष्णुरुद्रेश्वर सदाशिव संज्ञाः; अन्नमयाद्यात्माकारस्य सदाशिवस्यानन्दमयस्यापि कारणं परमशिवाख्यं ब्रह्म तत्प्राप्तिरुच्यते - ~~तदेव~~ तदभेदादानन्दमयस्य ब्रह्म व्यपदेश इति सर्वथा आनन्दमयः परमेश्वर इति सिद्धं - ब्रह्मणः परमशिवस्य समन्वयसिद्धं जगत्कारणत्वादिकं लक्षणं प्रधानजीवयोर्न व्यभिचरतीति स्थापितं - अतः परं जीवसमष्टी रूपस्य हिरण्यगर्भस्य जगत्कारणत्वादिकं श्रूयते इत्यत आह—

॥ नेतरोऽनुपपत्तेः॥

यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्यां। यदोषधीभिः

पुरुषान्र पशूंश्च विवेशभूतानि चराच
राणि· इति महोपनिषदि श्रूयते स्थवि
रचयः अत्र सकलजगत्सृष्ट्यादिहेतु
त्वेन श्रूयमाणः पुरुषः परमेश्वरः अ
न्योवेति संशयः हिरण्यगर्भइति पूर्वः
पक्षः कर्त्री, लिङ्गात् प्रकार्णेवेतु तौलो
क्ये ब्रह्मनारायणात्मकः। भोभीरु रुद्या
गतश्चेते तौ लोकस्य ग्रास बृहितइति॥
पुराणवचनात् ब्रह्मण स्समुद्रस्थापितव
भवगम्यते·· तदिह श्रूयते, लिङ्गं मध्या तल्लि
यमैत स्समुद्रे कवयो वयन्तीति प्रजापति
श्चरति गर्भे अन्तइति सप्तोपक्रमे
सर्वानुपपतिषत्तया वगम्यते उपसंहा
रेच- सूर्याचन्द्रमसौ धाता यथापूर्व
कल्पयत् दिवंच पृथिवीञ्चान्तरिक्ष
मित्यादिना तस्यैव कारणत्वमवगम्य

१९.13. ते - तस्मादुपक्रमोपसंहारसिद्धस्यों
वीतरसिद्धधर्मोपपत्तिः - किंच तत्प्रतिपा
दन पदे श्रौतस्योपसंहारस्य कृतः अद्भ्यः
संभूतो हिरण्यगर्भ इति .... ति
अद्भ्यः संभूत इत्यत्र प्रजापतिरेव
हि प्रतिपाद्यः प्रजापतिश्चरति
जायमानो बहुधा विजायत इति कीर्तनात्
हिरण्यगर्भः समवर्तताग्र इत्यत्रापि -
प्रजापतिर्वै हिरण्यगर्भ इति श्रवणात्
ततो हिरण्यगर्भस्यैव जगत्प्रसूति
हेतुत्वादिना प्रतिपाद्यत इति प्राप्ते
ब्रूमः - परमेश्वरादितरो भिन्नो हिर
ण्यगर्भो न प्रतिपाद्यः जगत्प्रसूति
हेतुत्वादीनां परमेश्वरधर्माणां तस्मि
न्ननुपपत्तेः यतः प्रसूता जगतः प्रसू
तीत्यारभ्य जगत्प्रसूतिहेतोस्तस्य अतः

परं नान्यत्कणीयसीहि: परात्परं यन्महे
तो महान्तं यदेवमव्यक्तमनन्तरूपं वि
श्वं पुराणं तमसः परस्तात् इत्यादिनास
र्वोत्कृष्टत्वं तमसः प्रकृतिमंडलात्परत्वंचा
वगम्यते तदण्डान्तर्वर्तिनो हिरण्यगर्भ
स्य असंभवति किंच य एनं विदुरमृतास्ते
भवंति इत्यस्य ज्ञानादमृतत्वं मुक्तिरभिधी
पूतेः न हिरण्यगर्भे संभवति - परमेश्व
रस्य हि मुक्ति हेतुत्वं: साधारणं लिङ्गं यदा च
र्मवत् आकाशम्(म्) वेष्टयिष्यन्ति मान
वाः। तदा शिवं विज्ञाय दुःखस्यान्तो
भविष्यतीति श्रावणात् - यदुक्तमुपक्रमो
पसंहार सिद्ध इति तदप्रयोजकं अ
नुपपत्त्या प्रजापतिधातु शब्दो हिरण्यग
20A र्भं विहाय प्रजानां ...... ति जगद्धा
रकं परमेश्वरमेव प्रतिपादयन्तः -अर्थः

खीभूतो हिरण्यगर्भ इति। उभयत्रापि परमे
श्वरस्यैव प्रतिपाद्यः य ईशे अस्य द्विपदः
चतुष्पदः आदित्य वर्णं तमसः परस्ता
दिति विश्वेश्वरत्व .... तल्लिङ्गात् त
तोजगत्कारणत्वादिना प्रजापतिशब्दवा
च्यः परमेश्वरः न हिरण्यगर्भः। प
रमेश्वरे हिरण्यगर्भस्याभेदात् जगत्का
रणत्वमस्तीत्याशङ्क्याह।

॥ भेदव्यपदेशाच्च ॥

अस्यां महोप ....मेश्वर हिरण्य
गर्भयो भेदो व्यपदिश्यते कारण कार्य
त्वेन यो बेदानां प्रथमं पुरस्तात् विश्वा
धिको रुद्रो महर्षिः हिरण्यगर्भं पश्य
ति जायमानमिति अतो हिरण्यगर्भा
दि सर्वप्रपञ्चस्य कारणत्वमीश्वरस्येतिसि
द्धं। पुनराशङ्क्याह ——

॥ कामाच्च नानुमानापेक्षा ॥

प्रजापतिरकामयत प्रजाः सृजेयेति· सर्व
त्र श्रुतिषु संकल्पो हिरण्यगर्भस्य ज
गत्सृष्टौ श्रूयते तथापि·· स्य जगत्कारण
त्वे अनुमानापेक्षा युक्त्यपेक्षा नास्ति·
तस्य कामस्य आंतरसृष्टिविषयत्वात् - प
रमेश्वरस्यैव हिरण्यगर्भात्मना अवांत
र सृष्टौ ......ेति वक्ष्यति· संज्ञामूर्तिक्लृप्ति
स्तु त्रिवृत्कुर्वत उपदेशात् ..... नेन जीवे
नात्मनानुप्रविश्य नामरूपे व्याकरवा
णीति । हिरण्यगर्भरूपेणात्मना प्रप
ञ्चानुप्रविष्टस्य परमेश्वरस्य नामरूप
कर्तृत्व श्रावणात् अनयोरभेद एवाभ्यु
पेय· इत्याह - १·
२०13: अस्मिन्नस्य च तद्योगं शास्ति ॥
अस्मिन्नुपनिषत्तत एव अस्य हिर

ण्यगर्भस्य तद्योगी तस्यपरमेश्वरस्य वो
पात संबन्धं ख्यास्तीति· मन्त्रभागः ब्रह्माधि
पतिः ब्रह्मणोऽधिपतिरिति, ततः परमेश्वरस्य
व ···· जगत्कारणं तच्छेषभूतो हिरण्यगर्भ
इति सिद्धम्॥ तदितरः पूर्वैरधिकरणन्यायैः
सर्वज्ञत्वं नित्यतृप्तमनादिबोधं ... दृप्त
क्तिकं अनन्तशक्तिकं जगद्द्रूप कारणं
समस्तोपनिषत्तत्समन्वयैकप्रतिपा
द्य प्रकाशक ... खिल प्रपंच विशिष्टौ
य स्वभावं सच्चिदानन्दस्वरूपं संसार
पाशविच्छेदकारणं चिदचित्कर्मान्तरं
शिवतत्वं परब्रह्मेति सिद्धम् तस्यसा·
धकानां संसार भेषजं मनस्समाधान
यो....... रूपं प्रकाशयितु मिदमधि
करणमारभ्यते

॥ अन्तस्तद्धर्मोपदेशात्॥

य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते
हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् स
र्व एव सुवर्णः ......। कप्यासं पुण्डरीक
एवमक्षिणी इति छान्दोग्ये विषयः
श्रूयते अयमादित्यान्तवर्ती हिरण्मयः
पुरुषः परमेश्वरः देवताविशेषो वेति संश
यः एवं सति सर्वाधारस्य सर्वगतस्य
परमेश्वरस्य ...... यान्तर्वर्तित्वं
न संभवति - स्वेच्छयाङ्गीकारे ति लो
चनत्व नियतं तद्धि न विद्यते पुण्डरीक
मेवाक्षिणीति लोचनद्वयमेव श्रूयते - अ
थवा स्वेच्छागृहीतोऽपि देहः संसारिण
21-A मिव परमेश्वरस्यापि दुःखमुत्पादयेदे
व स्वेच्छासंबंधेऽपि पावकस्य दाहकत्वं
संभवात्. एवं ततः परमेश्वरस्य शरीरसंबन्धो
न युक्तः तस्मादयं कश्चिद्देवताविशेषएव

न परमेश्वर इति पूर्वः पक्षः । सिद्धान्तस्तु
परमेश्वर एव कुतः तद्धर्माणामुपदेशात् ।
एष सर्वेषां लोकानामीष्टे सर्वेषां लोकानां
तस्योदितिनाम स एष सर्वेभ्यः पाप्मभ्यः
उदित इत्यादिना प्रतिपादितः सर्वलोक
कामेश्वरत्व सर्व पाप्मराहित्यरूपो धर्मो
हि परमेश्वरः एको हि रुद्रो न द्वितीया
य तस्थुः य इमांल्लोकानीशत ईशिनी
भिः । एको बहूनां विदधाति कामानि
त्यादि श्रवणात् सर्वाधारस्य सर्वा
तस्य आदित्यान्तर्वर्तित्वं न संभवती
ति यदुक्तं तत्तनविरोधः । सर्वाधारः
सर्वगतः स परमेश्वरः साधकानुग्रहा
य किमपि रूपं समाश्रयाय सवितृमण्ड
ले मध्ये वसति । शरीरसंबन्धात् स्मदा
दिवत् ईश्वरस्य न संसारदोषापत्तिः

श्रुतिरेव भगवती इत्यस्य सकलपापराशि
त्वं शरीरसंबन्धं च प्रतिपादयति वयं हि
श्रुतिप्रमाण्य शरणा न युक्तिं सह
मन्महे पावकोऽपि न शक्नोति (अं.) दाहकं
यथा कप्यासं पुण्डरीकमेवं अक्षिणी
इति त्रिलोचनस्य परमेश्वरस्य लो
चनद्वय ग्रहणं - पुण्डरीकसादृश्य वर्णनार्थं
न तृतीयलोचनाभाव द्योतनपरं - तथा हि
त्रिपुत्रं ब्राह्मणं प्रति द्विपुत्रा वृत्ता वस्य
21-13 विनुकल्पौ इत्यं.. युक्तं च संख्याग्राह
णं न शेषपुत्र निषेधपरं किंतु पुत्रद्वयस्था
विनिसादृश्य परं तद्वदत्रापि कमुदकंर
श्मिभिः विकसतीति इति विकासित पुण्डरी
कं यथा र... ति तथा परमेश्वरस्य लो
चनद्वयं . तृतीयलोचनं... मुकुलितस्वभा
वं न विकासितपुण्डरीकसदृशी भवति.

मुकुळित पु .... मित्यभिप्रायः
असौ योऽवसर्पति नीलग्रीवो विलोहि
तः उतैनं गोपा अदृश्रन्नदृश्रन्नुदहा
र्यः उतैनं विश्वा भुवनानि ....
.. यातिनः इति नीलग्रीवस्य परमेश्व
रस्य भूतप्रत्यक्षत्वावगमात् स्वरू
पाहित मंडलस्ति ... रविरिति ... त
स्य त्रिलोचनत्वावगतेश्चा दित्यपूर्व-
पक्ष्यः परमेश्वरः प्रभामंडलमध्य
वर्ती अन्यथा कल्पमस्य नीलग्रीवत्वं
त्रिलोचनत्व ... च्येत- असावादित्यो
ब्रह्मेति ब्रह्मव्यपदेशश्च तस्मादेतत्
दित्यइति मण्डलवर्ती सूर्यपूर्व इत्य
त्राह —
॥भेदव्यपदेशाच्चान्यः॥
मंडलाभिमानिनोऽस्मात् चेतनरूपाद्

दित्यात् भेद एव हिरण्मयरूपं पर
मेश्वरः भेदव्यपदेशात्: य आदित्ये-
तिष्ठन्नादित्यांतरोयमादित्यो नवेद
यस्यादित्यः शरीरं य आदित्यम
न्तरे यमयति एषत आत्मा अन्तर्याम्य
मृत इति । अत्रामृत शब्देन शिव उच्यते
एतानि वा अमृतस्य नामधेयानीति-
श्रुतेः शिवपरशैवापर जापालोपनिषः
श्रवणात् आ.धा. देहेद एव परमेश्व
रस्य तदविदितत्वादि धर्मं व्यपदिश्यते
224.तस्मादा.ध्य. चेतनादन्य ईश्वरो-
हिरण्मयो नीलग्रीवो विलोहित इति नी
लग्रीवः परमेश्वर एवादित्यांतर्वर्तीप्र
तिपाद्यते तदात्मतया तच्छब्दवाच्यत्वं-
न. नीलग्रीवः परमेश्वरः आदित्यांतर्व
र्ती, नारायण एव तथा हि सर्वत्र लौकिकाः

पठंति।

ध्येयस्सदासवितृमंडलमध्यवर्ती नारायणस्सरसिजासनसंनिविष्ट इत्यादिना तस्यैव पुंडरीकसदृशाक्षिद्वय संबन्धो युक्तः पुंडरीकाक्ष इति प्रसिद्धेः किमन्यथा प्रतिपादनप्रयासेनेति चेत् न परमेश्वरासाधारणलिङ्गानां हिरण्मय पुरुषे दृश्यमानानां नारायणे अनुपपत्तेः तथाहि सूत्तविषयस्य संदिग्धस्य वाक्यस्यासंदिग्धैः वाक्यांतरैर्निर्णयो युक्तः महोपनिषदि श्रूयते आदित्यो वा एष एतन्मंडलं तपतीत्यादि– तत्र य एष एतन्मण्डले र्चिर्दीप्यत इति मंडलप्रभा य एष एतस्मिन् मंडलेर्चिषि पुरुष इति मंडलाभिमानिसूर्यमभिधाय अन्तरादित्ये हिरण्मयः पुरुष इति।

हिरण्मयपुरुषमभिध्याय आदित्यान्तर्यामि
णं- स्मृतः ...... पुनरादित्यो वै तेज-
ओजो बलम् (मृ.) यश इत्यादिना तस्यादि
त्यरूपस्य विभूतिमभिध्याय यएषपु
रुष एष भूतानामधिपतिरिति भूतपति-अ
भिधेयस्य पुनः कीदृश इत्याकांक्षायां स
र्वो वै रुद्र इत्यारभ्य हिरण्यबाहवे हिरण्य
पतये अंबिकापतये उमापतय इत्युपसंहृ
तं- तत बाहुरादृणस्योपलक्षणत्वात्-
हिरण्यरूप इति तात्पर्यं- अतो हिरण्य
22.13 रूप सहस्ररूप उमापतिरादित्यमंडल
वर्तीति सिद्ध्यति तत नीलग्रीव त्वमुमापति
त्वमित्यादि विशेषलिङ्गं परमेश्वरादन्य
त तस्यायोगात्- पुंडरीकाक्षत्वं तु सा
धारणं लिङ्गं नारायणादन्यत्रापि तस्य
दर्शनात्- कमललोचना नारी कमलाक्षः

पुरुष इति - अतो विशेषलिङ्गेन सामान्यलिङ्गस्य बाधः - ध्येयस्सदेत्यादि लौकिकोप-चनं भाक्तमेव ततो हि ~~स्य सद~~ ष्य सहस्रास्य स्तिनो नमो नीलग्रीव उमापति- स्सकललोककामेश्वर सर्वपापमना पूतो भगवान् सान्तीती पतिपाद्यः आदित्यान्तर्वर्ती परमेश्वर .. सर्वेषां मुमुक्षूणां मुख्ये य इति सिद्धं ।।

सर्वज्ञत्वादि धर्मकस्य शिवस्य परब्रह्मणः परम मंगलास्पदं उपास्यं स्समभिध्याय तल्लक्षणं तु नामरूढिवशात् अन्यतापित्व्याप्ति शंकायां इदमधिकरणमारभ्यते ।।

।।"आकाशास्तल्लिङ्गात् ।। अतएव प्राणः ।।

छान्दोग्ये श्रूयते स्य विषयः - सर्वाणिह वा-

इमानिभूतानिं आकाशादेवसमुत्पद्यंते आ
काशंप्रत्यस्तंयंति सर्वाह्येवा इमानिभूतानि
प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत
इति अत्र सकलभूतोत्पत्ति प्रलयकार
णप्रतिपादकौ प्राणाकाशशब्दौ परमेश्व
रप्रतिपादनपरौ किंवा भूताकाशप्राण
वायुप्रतिपादनपराविति संशयः प्राणाद्ध्ये
व खल्विमानि भूतानि जायंते प्राणेन जा
तानि जीवंति प्राणं प्रयंतीत्यादि श्रुतेः आ
काशाद्वायुरित्यादि श्रुतेश्च प्राणाकाशयो
रपि सकलभूतकार ....

२३:४ .... प्राणाकाशशब्द
वाच्यः परमेश्वरएव सर्वकारणत्वादि-
तल्लिङ्गात् - नह्येनयोस्सर्वकारणत्वादिकं
संभवति तत्तानन्दरूपस्य ब्रह्मणः का
रणत्ववादे तात्पर्य ....

- - - - - - -णत्वबादे- किं त्वनुवादमात्रं-आ
काशस्य भूतान्तर्वर्तितया सर्वशब्देन-श्र
हणात् सर्वभूतोत्पत्तिरात्मन आकाश
स्से भूत इतिश्रुत्या परमेश्वरादेव-त
स्मात्सर्वभू: ....
.... त: ; :: भूताकाश इत्युपपदग्राह
णेन किमिति चेत् परमाकाशस्य परप्र
कृतिरूपस्य सर्व~~कार~~ भूतकारण त्वसं
भवात् :प्रयोजनं . तर्हि परमेश्वर इति क
थं ....

॥ .... भिधानात्॥

पूर्वं निखिलभुवननायकस्य निर
स्तसमस्तदोषवासनाकलंकस्य नि
रतिशयमांगल्यरत्नाकरस्य ~~उम~~
उमापतेः परक्ष ....
.... तदिह त: स्थानांतरमुच्य

ते छान्दोग्ये श्रूयतेऽस्य विषयः अथ यदतः परो दिवोज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु..................

...... इत्यादि अत्र सर्वलोकव्यापृतया दिवि श्रूयमाणं परं ज्योतिः परमेश्वरो वा तदन्यो वेति संशयः द्यौशब्दस्याकाशवाचित्वात् परो दिवइति।

२३. ....वो

१३. तः पुरुषे ज्योतिरिति पुरुषान्तर्वर्तितया जाठराग्निरिति पूर्वः पक्षः - सिद्धान्तस्तु परोदिवोज्योतिरिति सर्वोत्तमं परं ज्योतिरिति परमेश्वरएव पूर्वत्तपादोस्य..................

· नाभिमभिधानात् नैतत्संभवति जाठराग्नि सूर्ययोः परिच्छिन्नत्वात् -

पूर्वं गायत्रीवा इदं सर्वं भूतमिति सर्वात्म
तया गायत्री प्रतिपाद्यते - प्रकरणात्तदे
कांश [illegible] त्वमत ....
.... रा हेत्यत आह -
॥ छन्दोभिधानान्नेति चेन्न -
- तथा चेतोर्पण निगदात् -
- तथा हि दर्शनम् ॥
पूर्वं गायत्रीवा इदं सर्वं इति छन्द
सोभिधानात् तस्यैवा - ......
.... गायत्र्याख्य
छन्दोमात्रस्य सर्वभूतात्मकत्वं किंतु
गायत्री सादृश्यानुसंधानोपदेशः प
रमेश्वरस्य क्रियते - यथा गायत्री षड
क्षरैः स्चतुर्भिः [illegible] ....
.... न्यत्रापि छन्दोभि
धायी शब्दः सादृश्यादर्थान्तरे प्रयुज्यमा

नोद्दश्यते यथा संवर्ग विद्यायां म (मः) तेष
प्ते पञ्चान्ये पंचान्ये दश सत्कृतमिति
उपक्र...................
.... मेश्वरस्य लिङ्गेन श्राय
नी प्रकरण बाधः अतः परमेश्वर एव ज्यो
तिरिति - पुनरनुपपत्तिमाह :
॥ भूतादिव्यपदेशोपपत्ते-
श्चैवम् ॥ १
२७ भूत पृथिवी शरीर हृदयं चतुष्पदेति
व्यपदेशो नागायत्र्यात्मके छन्दस्युपप
द्यते परमेश्वर एवोपपद्यते - पुनराशङ्क्य
परिहरति -
॥ उपदेशभेदान्नेति चेत् - नोभ-
- यस्मिन्नप्यविरोधात् ॥
ननु पादोऽस्य सर्वा भूतानि । त्रिपाद
स्यामृतं दिवीत्यत्र द्युसंबन्धप्रत्यभि

ज्ञानात् ज्योतिर्वाक्ये परमेश्वरप्रतिपा
द्य इति - न सारं उपदेशभेदेन विरोधात् प्र
त्यभिज्ञाना सिद्धेः त्रिपादस्यामृतं दिवी
ति परो दिवो ज्योतिरिति - विभक्तिभेदेन -
उपदेशभेदः अतो विरोध इति चेत् न - उभ
यत्रापि विरोधाभावात् यथा वृक्षाग्रे श्येन
वृक्षाग्रात् परः श्येन इति व्यपदेशः अत उ
भयत्रापि दिवः परत्वमेव विवक्षितमिति -
अनेन लिङ्गेन परमेश्वर एव पुरुषसूक्तादि
तः पुरुष इति सिद्धं - पादोऽस्य विश्वाभूता
नीति तत्रापि श्रवणात् - ततो निजैकांश
समाधृ सकलप्रपंचं दिवि दीप्यमानं परं
ज्योतिः परमेश्वर इति निर्णयः - भग
वत्स्य बिम्बमंडले साक्षादुपास्यतया नि
र्दिष्टस्य परमेश्वरस्य तस्मिन्नधिकरणे वि
श्वात्मकत्व मुक्तं - तदात्मकतया अन्येषां

उपास्यत्वं नान्यस्येति प्रतिपादयितु मिदमधिकरण मारभ्यते·

॥ प्राण स्तथा नुगमात्॥

अस्य कौषीतकोपनिषदि श्रूयते — प्राणोऽस्मि प्रज्ञात्मा. तं मामायुरमृतं उपास्व इतीन्द्रवचनं· अत्रोपासना विषयत्वेन प्राण शब्द सामानाधिकरण्येन निर्दिष्ट इन्द्रो वा
२४·१३·परमेश्वरोवेति संशयः· इह प्राणोऽस्मि-प्रज्ञात्मा तं मामिति प्राण शब्दस्य साक्षादिन्द्रेण सामानाधिकरण्य मवगम्यते· मामुपास्वेति· तद्विषय एवोपासना विधिः श्रूयते तस्य प्राणत्वं वृष्टि द्वारा सकल रक्षकत्वादुपपद्यते सकलोपास्यत्वं च परमैश्वर्यवत्वादुपपन्नं· तथाहि श्रुतिः इन्द्रो राजा जगतो य ईशो इत्यादिः त स्मादिन्द्र एवोपास्यतया निर्दिश्यत इति पूर्वः

पूर्वपक्षः- सिद्धांतस्तु परमेश्वर एव कुतः? आ
नन्दाजरामृत प्रज्ञादीनां तदसाधारणध
र्माणां अस्मिन् प्राण शब्द निर्दिष्टेऽनुगमात्
एष प्राण एव प्रज्ञात्मा नन्दोऽजरोऽमृत इ
ति- इन्द्रो राजेति श्रुतः विद्वच्छब्दत्वे ईश्व
र विषयः प्रकरणादेवगम्यते। आक्षेप
परिहरति-

॥ न वक्तुरात्मोपदेशादिति चेत्-
- अध्यात्म संबन्ध भूमा ह्यस्मिन्॥

नायमुपास्यः परमेश्वरः- उपक्रमे मामे
व विजानीहि त्रिशीर्षाणं त्वाष्ट्रमहनम
त्यादिना प्रज्ञात जीवभूतस्येन्द्रस्य उपा
स्यत्वोपदेशात् अतः उपसंहारस्तदनु
गुणो नेतव्य इति चेन्नैतदुचितं उपक्रमा
दारभ्यास्मिन् प्रकरणेऽध्यात्म संबन्ध
स्य परमेश्वरधर्मस्य बाहुल्यात् तथाहि-

उपक्रमे तावत् यं त्वं मनुष्याय हिततमं म
न्यसे इति हिततमोपासनं प्रारब्धं - तत्ता
वत्परमेश्वरधर्मः - तदुपासनस्यैव
मोक्षसाधनस्य हिततमत्वात् मध्ये च -
२६.A एष ह्येव साधुकर्म कारयति तं यमेभ्यः २९.A
लोकेभ्य उन्निनीषते एष एवासाधु क
र्म कारयति तमयं यो नीनषत इति सर्व-
कर्मकारयितृत्वं श्रूयते तद्यथा रथस्या
रेषु नेमिरर्पिता नाभावरा अर्पिता एवमे
व एता भूतमात्राः प्रज्ञामात्रास्वर्पि
ताः प्रज्ञामात्राः प्राणेऽर्पिता इति जड
चेतनात्मक सकल प्रपंचाधारत्वं श्रूयते
तच्च परमेश्वरधर्मः अतः परमेश्वरध
र्म साहचर्यात् इहोपास्य इन्द्रो न भवति - क
थमिन्द्रो जीवत्वादनुपास्योऽपि स्वविष
यमुपासन मुपदिशतीति आशङ्कायामाह -

॥ शास्त्रदृष्ट्यातूपदेशो वामदेववत्॥
अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति इत्यादि शास्त्रदृष्ट्या सर्वशब्द वाच्यत्वात्परमेश्वरस्य स्वशरीरकतया स्वशब्दवाच्यं परमेश्वरमेव उपास्यत्वे न उपदिष्टवानिन्द्रः अत इन्द्रशब्देनोपदेशः परमेश्वरस्य - इत्येतमाह वामदेववत्: वामदेवोऽपि स्वस्य परमेश्वरात्मदृष्ट्या अहं मनुरहं सूर्यश्चेत्युपादिशत् दृशात्वादि न्दोषदेशः - अथवा वेदीत विज्ञानोपलब्धया ब्रह्मसामरस्य भावनया ब्रह्मभावमुपगतस्य विगलित मनुष्यादि देहविषयकल्पिताहंभाव संकोचस्य संपन्नविश्वाकार परहंभावस्य वामदेवस्य स्वात्मनः सर्वगतत्वावगमात् मनुसूर्यादि-

प्रपंचभावोक्तिः। एवमिन्द्रस्यापि निरूप्यते। 2013 प्राणोस्मि प्रज्ञात्मेति प्राणशब्देन परं ब्रह्मोच्यते। तस्यानन्दरूपत्वेन सकलप्राणनहेतुत्वात् प्राणएव प्रज्ञात्मानंदोऽजरोऽमृत इति श्रवणात्। तथा चाहं ब्रह्मास्मि मामुपास्वेति ब्रह्मदृष्ट्या उपदेशः। तथा हि कृष्णादयोपि अर्जुनादीन् प्रति उपदिष्टवंतः। पुनराशङ्क्याह—

॥ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासा त्रैविध्यादाश्रितत्वादिह तद्योगात् ॥

ब्रह्मज्ञानोपासनया ब्रह्मभावमुपगतस्य विगलितजीवभावस्य तद्रूपदृष्ट्या स्वस्मिन्नुपास्यत्वं च सर्वात्मभावोपदेशोपयुक्तः। अत्रातु त्रिशीर्षाणं त्वाष्ट्रमहनम्। यावद्ध्यस्मिन् शरीरे प्राणो

वसति तावदायुरित्यादौ जीवलिङ्गमु[illegible]
ख्य प्राण ~~प्राण~~ लिङ्गं च दृश्यते ततो
यमुपदेशो न युक्त इति चेन्नैवं वाच्यं
यतो जीवप्राणशब्दवाच्यत्वं परमेश्वरस्य
समुचितोपासनात्रैविध्याद्धेतोः। अत्र प
रमेश्वरस्य स्वरूपेण [illegible] शरीरेण भो
भोक्तृ शरीरेण भोग्यरूपेण चोपासनं
त्रैविध्यमिह विवक्षितं। आत्मतया
भोक्तृभोग्याश्रितत्वेन च तदुपपत्तेः।
परमेश्वरस्य स्वरूपोपासनं विलोके
न मुक्तिहेतुः अन्यदपि द्वयं कालेनेति
तस्माद्दिह परमेश्वरात्मतया इन्द्रस्यो
पास्यत्वसिद्धिरिति निर्णयः॥

इति

श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमां
साभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः॥

ब्रह्मबोधकानां वेदीतवाक्यानां आन
२६.A न्यात्यातिवाक्यं १ विरुचारानुपपत्तेः
सन्दिग्धानां केषांचित् (द्रष्टा (१ त
(त्र) न्यायैस्तादृशानामपि निर्णयोभव
तीति कतिचिदेव वाक्यानि तात्पर्यलिङ्गः
समन्वयेन ब्रह्म बोधकानि श्रुतानि ·
तेषु कति· स्पष्टलिङ्गानि प्रथम····
निरूपितानि· कतिचि दनाति स्पष्टलि
ङ्गानि द्वितीयपादे विचार्यन्ते ॥

॥ सर्वत्रप्रसिद्धोपदेशात् ।

छान्दोग्ये श्रूयते स्य विषयः मनोमयः
प्राणशरीरो भारूपः सत्य सङ्कल्प आ
काशात्मा सर्वकर्मा स .... त्यादि·
अत्र मनोमयत्वादि धर्मकः श्रूयमाणः पुरु
षः परमेश्वरो जीवोवेति संशयः जीव
इति पूर्वःपक्षः· कुतः तस्य प्रत्यासन्न

त्वात् - अथ खलु क्रतुमयः पुरुषः य
थाक्रतु रस्मि...... को भवति तथेतः(तो)
प्रेत्य भवति स क्रतुं कुर्वीतेति - कर्म
वशादिह परिस्ताय परिभ्रमं (मन्) जी
वः प्रस्तुतः पूर्वं तदनन्तरं मनोमय
इतिश्रूयते अतएव मनोमयत्वादि धर्मकः
जीवः, मनोम........ रीरत्वादिकं
संसारलक्षणं नपरमेश्वर लिङ्गः सति
यथार्थसंकल्प इति सत्य संकल्पत्वमपि
संसारि धर्मत्वेन योजनीयं - अतः स
र्वथा मनोमयत्वादि धर्मको जीव एव न
२६। परमेश्वर इति................१ इवरप
व मनोमयत्वादि धर्मकः कुतः परख
हूणः परमेश्वरस्यैवो पक्रमे सर्वं ख
ल्विदं ब्रह्म तज्जलानीति शान्त उपासी
तेति सर्व कारणस्योपास्यत्वेनोपदे

शान्त: श्रुति तात्पर्यं ...... ज ......
...... ब्राह्मीनं जन्म स्थि — दृष्टसर्वं, एत
त् सर्वं चिदाचि रूपं ब्रह्म, सर्वं खल्वि
ति शान्त उपासीत ब्रह्मे, इति। यथा साग
रे संपन्न जन्म स्थिति विलयं बुद्बुद्क
दंबक मृत् रूप मेव दृश्यते, यथा श्रुति
ति........ न जन्मादिकं तन्मयमेव
तद्व्यतिरिक्तं किंचन नोपलभ्यते। तथा
अर्थशिरसि निरूपित मीश्वरेण। अह
मेकप्रथमासं वर्तामि च ह विश्या
मि च नान्य: कश्चिन्मत्तो व्यतिरिक्त: -
इति .... ह मित्यादिना वि
श्वरूपत्वमात्मन: प्रपंचितं सतवि
श्वरूप त्वो. सोन्तरादन्तरं प्राविशत्
इत्यनुप्रवेश एव हेतुरुक्त: ततो ब्र
ह्मणा अपृथक् सिद्ध जन्म स्थिति प्रवृत्ति

तादृस्य जगतः नह्य. . त । . . . .
तथाहि प्रत्युक्तावदीति - शक्तयो स्य जगत्
कृत्स्नं शक्तिमांस्तु महेश्वरः । शक्ति-
स्तु शक्तिमद्रूपात् व्यतिरेकं न वांछ
ति ॥ तादात्म्यमनयोर्नित्यं वह्निदा
हिकयोरिव । शक्ति शक्तिमतो र्यस्माद्
26.A भेदः स. . . . . . . १ . . . तस्तु धर्मधर्मित्वात्
पराशक्तिः परात्मनः - न वह्नेर्दाहिका श
क्तिर्व्यतिरिक्ता विभाव्यते इत्यादि - वायुसं
हितायां शक्त्यादि च पृथिव्यंतं शिवतत्त्व-
. . . .) न्नं । तेनैकेनतु तद्व्याप्तं मृत्क्वु
भा. . . . . . . ~~तेनैकेनतु तद्व्याप्तं~~ परास्य
शक्ति विविधा शक्तिः प्रबोधानन्दरूपिणी
एकानेक स्वरूपेण भाति भानोरिव प्रभा ॥
इति । परास्य शक्ति विविधैव श्रूयते स्वाभा
विकी ज्ञानबलक्रिया च । एक एव रुद्रोन द्वितीय

याय तस्य पूर्ण रूम....... शात दुष्टि नीमि
मि- र्जननीति परम शक्तिमि रित्यादयश्च परब्रह्म
ण स्स्वाभाविकानन्त जगज्जनन शासन
पालन शक्तिमत्वं स्तुत वो वदंति- किंबहु
ना श्रुति स्मृतीतिहास पुराण.......
प्रामाण्यात्सकल चिदचित्प्रपंच महाविभू
तिरूपा महासंविदानन्द सत्ता देशकाला
दिपरिच्छेद शून्या- स्वाभाविकी परमशक्तिः
परब्रह्मणः शिवस्य स्वरूपंच गुणश्च भ
वति. तस्माति............ र्ज्ञत्व स
र्वशक्तित्व सर्वकारणत्व सर्वनियंतृत्व सर्वो
पास्यत्वं सर्वानुग्राहकत्वं सर्वपुरुषार्थ-
हेतुत्वादिकं सर्वगतत्वंच नसंभवति- किं
च महेश्वर शिव महादेव रुद्रादि परमा
26/13 ख्याना.........१ संभवति- तस्मा
च सर्वचिदचित्प्रपंच शरीर विशिष्ट ब्रह्म

सर्व शब्दवाच्यं. यथात्रीन शब्दो न केवलं स्वस्यैव वाचकः किंतु स्वविशेषस्योत्पन्नस्यापि तथा प्रपंच शब्दोपि ब्रह्मणः. सर्व ..... सर्वोवै रुद्र इत्यादय उपपादयन्ति. ततः सर्वं खलु ब्रह्म. सर्वोऽहं चित्प्रपंच शरीरकं ब्रह्माभिव्यक्तेः ततो ब्रह्मरूपत्वात्प्रपंचस्य ह्युपाद्य विषयत्वाच्छांत एवोपासीतेति - एतमर्थं पौराणिकी ...... नहि. विराडेव देवस्य जगदेतच्चराचरं । एतमर्थं न जानन्ति पशवः पाशगौरवात् ॥ विद्येति चेतनी प्राहुस्त्वविद्यामचेतनीं । विद्याविद्यात्मकं सर्वं विश्वं विश्वगुरु .... सं देहो-रूपी तस्य वशो यतः ॥ सत्ये साधौ च सच्छब्दस्सद्भिरेव प्रयुज्यते । विपरीतेत्वसच्छब्दः कथ्यते वेदवादिभिः ॥ सच्चासच्च जगत्सर्वं

शरीरं परमेष्ठिनः। वृक्षस्य मूल .... पु
ष्यंति वै यथा। शिवस्य पूजया तद्वत् पुष्यत्य
स्य वपुर्जगत्॥ आत्मा तस्याष्टमी मूर्तिश्शि
वस्य परमात्मनः। व्यापिकेतरमूर्तीनां वि
श्वं तस्माच्छिवात्मकम्॥ देहिनो यस्य कस्या
२८A पि निग्रहः .... १ 'न ष्टमूर्तेस्त
न्नातात्कार्या विचारणा॥ सर्वोपकारकरणं।
सर्वानुग्रहणं तथा। सर्वातिशय प्राधानस्य-
शिवस्याराधनं विदुः। इत्यादिका- अत-
स्सर्वाकारत्वाद्ब्रह्मण स्सर्वं ब्रह्मेति शांतउ
पासीतेति स मंजसं एव। तस्मादुपास्य
त्वेनोपक्रमगतं कस्यैव मनोमयत्वादिधर्म
कं नच मनोमयत्वादिकं संसारिणो लक्षणं
उपास्याकारपरिग्रहाद्दस्य परिच्छेदसंभवा
त्। - यदुक्तं क्रतुमयस्य जीवस्य प्रस्तत
त्वात् मनोम ... इति यत्तदयुक्तं -

उत्पत्तिशिष्टब्रह्मावरुद्धायां उपासनायामवांत
रप्राप्तस्य जीवस्य प्रवेशयितुमशक्यत्वात्
यथा बिम्ब देवाविनिद्धाया आमिक्षायां
वाजिनः प्रवेशः । अतो ब्रह्मैव मनोमय
त्वादि धर्मत्वेनोपास्यमिति उपक्रमगतं
ब्रह्मैव मनोमयत्वादि विशिष्टमित्युक्तेवांत
रसिद्धस्य जीवस्य प्रसङ्गोऽनर्थकः स्या
दित्याशङ्कायामाह -
॥ विवक्षित गुणोपपत्तेश्च ॥
सत्यसंकल्पत्व सर्वकामत्वादीनां वि
वक्षितानां (म) गुणानां (म) (म)
ब्रह्मण्येवोपपत्तेः तदेवोपास्यं - अवांतर
सिद्धस्तु जीव उपासकः - तदाकांक्षायो
गादिति ॥ इह सामान्येन जीवस्य उपा
२८ स्यत्वं नास्ति । किंतूपासकत्वं नोपा
स्यत्वमित्यभिधातुमिदमधिकरणमारभ्य

ते:-

॥ अनुपपत्तेस्तु न शारीरः ॥

अस्य महोपनिषदि श्रूयतेऽस्य विषयः प-
तिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं
नारायणं महाज्ञेयं इत्यादि। अत्र विश्वप-
तित्वादिधर्मयुक्ततया नारायणशब्दवाच्यो
मूर्त्यात्मा परमेश्वरो वेति संशयः। सहस्र
शीर्षं देवमित्यारभ्य सहस्रशीर्षत्वादि
विधेयत्वेन नारायणस्य मूर्त्यात्मन एवो
द्देश्यत्वेनाभ्यासात् समुद्रेंतं विश्वंभु
वामिति समुद्रशायित्वलिङ्गात् - तत्प
र्यायवाचकाच्युत हरि शब्दादि प्रयोगाच्च
नारायण एव मूर्त्यात्मा विश्वपतित्वादि
ना लिङ्गेन प्रतिपाद्यत इति पूर्वः पक्षः।
सिद्धान्तस्तु नारायणात्मा परमेश्वर इति-
कुतः विश्वपतित्वादीनां परमेश्वरधर्मा

णां तदर्थान्तरे नारायणेऽनुपपत्तेः- पशू
नां पतये वृक्षाणां पतये जगतां पतये इ
त्यादिना परमेश्वर एव निखिल भुवनाधि
पत्यमभ्यस्यते- एको हि रुद्रो नद्वितीया
य तस्थुर्य इमांल्लोकानीशत ईशनीभि
२९१. रित्यादिना रुद्रव्यतिरिक्तस्य जगदी
श्वरत्वं निषिध्यते विश्वाधिको रु
द्र इति विश्वाधिकत्वं च तस्यैव श्रूयते अतो
विश्वपतित्वादिलक्षणयुक्तो नारायणा
त्मा परमेश्वर ..श्रूयते इति समीचीनम्
(म्) ननु नारायणात्मेति नारायणोऽर्था
भि परमेश्वर इति हृदयं तदयुक्तं- नारा
यणपरं ब्रह्मेति नारायणस्य परब्रह्मभूत
मुक्त्वा पद्मकोशप्रतीकाशं इत्यादिना पु
रुषस्य हृदयपुंडरीक स्थानमुक्त्वा- त
स्य मध्ये वह्निशिखेत्यादिना जीवस्वरूप

मुक्ता तस्याशिखाया मध्ये परमात्मा व्य
वस्थित इति परमात्मत्वेन जीवांतर्यामित्वेन
तस्योपास्यत्वमवगम्यते। स ब्रह्मा स शिव
इत्यादिनां विभूतित्वं ब्रह्मशिवादीनां उच्य
ते; अतो नारायण एव विश्वपतिः परब्रह्मभू
तो जीवांतर्यामित्वेनोपास्य इत्यशंक्यात्मक
त्वेन तदाधेयकत्वं तदुपास्यत्वं च परमेश्वरस्य
वक्तुं युक्तमित्यत आह -

॥ कर्मकर्तृव्यपदेशाच्च ॥

कर्मत्वं कर्तृ.....च व्यपदिश्यते। तत
ध्यातृध्येययोः परमेश्वरनारायणयोः -
कण्ठे ब्रह्मकोशपती काशमिति प्रकृत
स्य नारायणस्य ... न हृदयमुच्यते।
२९।१३ परमात्मा व्यवस्थित इति परमेश्वरस्य
च परमात्मा तदन्तर्वर्तितया ध्येयत्वेनो
च्यते। ततो ध्यातृत्वेन नारायणस्य ध्येय

त्वेन परमेश्वरस्यच कर्तृत्वं कर्मत्वंचव्यप
दिश्यते. अतोनारायणादन्य एवोपास्यः -
परमात्मा सब्रह्म, सशिव इत्यादिना ब्रह्म
विष्णु रुद्रेन्द्रादि प्रपंच विभूति विशिष्टत्वं
परमेश्वरस्यो पदिश्यते. अत विष्णोरस्माह
णेपि कैवल्योपनिषदि श्रूयते. हृत्पुंडरी
कं विरजमित्यादिना हृदयपुंडरीकं प्रस्तु
त्य. उमासहायं परमेश्वरं प्रभुं त्रिलोचनं
नीलकंठं प्रशांतं ध्यात्वा मुनिर्गच्छति:
भूतयोनिं समस्तसाक्षिं तमसः परस्ता
त्. : ब्रह्मा स्स शिव स्सेन्द्र स्सोक्षरः
परम. स्वराट्. सएव विष्णुः सप्राणः
सकालोग्नि रित्यादि - त.ऋथा योत्ताध्या
हार्यः - यो वै रुद्र स्सभगवान् भूर्भुव..
स्वः यश्च ब्रह्म, तस्मै वै नमो नमः -
यश्च विष्णुर्य.. संमहेश्वरः - इत्याद्य

र्थर्वण श्रुतिरपि :: व्या - अतत्त्वि श्रुति
त्वेन ब्रह्मद्विवयोर्मध्ये विष्णोरग्रहणं पर
मेश्वरोपासकतया तस्य प्रस्तुतत्वादित्यवि
रोधः .. सहस्रशीर्षा इत्यारभ्य प्रस्तु
तस्य पुरुषस्य पादोऽस्य विश्वा भूतानि
30.A भूतानीति · निजैकांशा जगद्वि १ शिष्टत्वमु
च्यते सहस्रशीर्षं देवं इति · सएवात्तनाराय
ण इति बोध्यते सनीयं नारायणपरं ब्रह्मेति
ब्रह्मत्वेनोच्यते - ब्रह्मैवाहि सर्वोपास्यं नान्य
मस्य तथाभूतस्यान्यं प्रत्युपास्यकत्वमित्य
त आह - .

॥ शब्दविशेषात् ॥

नारायणपरं ब्रह्मेति शब्दविशेषएव ना
रायणात्परमिति ब्रह्म प्रतिपादयति · अतो
नारायणादन्यश्चैव परं ब्रह्मोपास्यं - पर
ब्रह्मण स्सहस्रशीर्षत्वादि विशिष्टं पुरुषस्

पेण जगदुपादानत्वात् परब्रह्मात्मक
स्य तस्य जगदाकारत्व मिति वक्ष्यामः-
प्रकृति श्चेत्यधिकरणे - नारायणस्योपा
स्यत्वे प्रमाणांतरमाह-

॥ स्मृते श्च ॥

एवमुक्त्वा महाबाहु र्महायोगीश्वरो हरिः।
दर्शयामास पार्थाय योगमीश्वर गोचरम्॥
इति स्मृतेश्च महायोगस्वामिनो नारा
यणस्य परमेश्वर विषयो योगः समाधिरभि·
~~धीयते~~ धीयते- अत अहं यजावदाराघ्यः
कृष्णेनाक्लिष्टकर्मणा। तस्मादिह तमः कृ
ष्णादन्यो न विद्यते॥ इति अश्वत्थामानं
प्रति परमेश्वर वचनं च तस्मादन्यन्ना
रायणादुपास्यं - पुनरनुपपत्ति माशङ्क्या
ह-

॥ गुरुभक्तोक ~~स्मात्~~ स्त्वात् लब्धोपदेशा-

- च नेति चेन्न निचाय्यत्वादेवं-
३०:13 - व्योमवच्च ॥

नीवारशूकवत्तन्युतातीता भास्या-
त्तनूपमा - तस्याः शिखाया मध्ये पर
मात्मा व्यवस्थित इति · स्वल्पशिखा
न्तर्वर्त्तितया स्वल्पाशयत्वादल्पव्यप
देशाच्चायं व्यापी न परमेश्वर इति चे
न्न · उपास्यत्वात्तथा व्यपदेशः - न स्व
रूपाल्पत्वात् · व्योमवत् स्वरूपमहत्व
स्य सिद्धत्वात् : यथा सूच्याद्युपाहित
स्य व्योम्नः तदुपाधिवशादल्पत्वं
स्वरूपतो महत्वं च : न विरोधः - पुनरा
शङ्क्य परिहरति · -

॥सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥

यदुक्तं नारायणपरं ब्रह्मेति - नारायणा
त्परमुपास्यं ब्रह्म · तदेव हि ऋतं सत्यं

परं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्वरेतं वि
रूपाक्षमित्युच्यते । तत्र परमशक्त्युमा
शबलाकारतया कृष्णपिङ्गलं कृशानुरे
तस्कतयाच ऊर्ध्वरेतस्कं त्रिलोचनत
या विरूपाक्षं पुरि पूर्वोक्ते दहरपुण्ड
रीके शेते इति पुरुषः ऋतं सत्यं भवो
वाविपर्यासराहित्यं परं ब्रह्मेति लक्षणं
अतीति त्रिलोचनादि लक्षण शरीरसंबन्धा
त् शरीरगत सुखदुःखादि संभोगा
प्राप्तिरिति चेन्न वैशेष्यात् । सुखदुः
३१ खभोगहेतुभ्यो जीवशरीरेभ्यो ब्रह्म
रूपस्यास्ति वैशेष्यं । इच्छागृहीतत्वा
दस्य । तेषां कर्ममूलत्वात् अत एव श्रू
यते परमेश्वरः अपहतपाप्मा विजरो
विमृत्यु र्विशोको विजिघत्सो विपिपा
सः सत्यकामः सत्यसंकल्प इति संख्यात

शारीरधर्मरहितत्वेन - नचैवं संसारि जीवः - अतएवा प्राकृतानि पापजरामरणशोकादिना रहितानि स्वेच्छासंपादितानि लीलामङ्गलरूपाणि परमेश्वरस्याग्निरेव [illegible] मेरं रौः पुरुरूप ऊमाः इत्यादिषु स्वीयाणि नित्यानि विज्ञायंते. ततःपरं ब्रह्मणः परमेश्वरस्य जीवाद्वैशेष्यात् न तद्वच्छरीरगतदोषापत्तिः - अतएवलु उपक्रमादि लिङ्गैः विरूपार्थं ब्रह्म सर्वोत्कृष्टं मुपास्य [illegible] मिति युक्तमेव - तथा. उपक्रमे अणोरणीयानित्यादिना महिमानमीशमित्यं तेन सकलजंतुहृदय गुहा.वर्तित्वेन स्वप्रसादातिशय वीतशोक पुरुषदर्शनविषयत्वेन च महिमातिशयवानीशः प्रस्तुतः - पुनस्सप्तप्राणाः प्रभवंतितस्मादित्यादिना सप्तवरमशक्तिमान

प्राणादि जगदुपादानत्वेन निरूपितः - ततश्च
यो देवानां प्रथमं पुरस्तात् विश्वाधिको
रुद्रो महर्षिः हिरण्यगर्भं पश्यत जायमा
३१.13 नमिति- विश्वाधिकत्वेन सर्वज्ञत्वेन
सकलकार्य प्रथम हिरण्यगर्भ जनकत्वेन
च निमित्तभूतः परामृष्टः - स पूर्वत
तः परेण नाकमिति पराकाशगुहावर्ती
त्यक्तफलकर्मानुष्ठायिनां वेदान्ततात्पर्यवे
दिनां मु. यतीनां जितेन्द्रियाणां परामृता
त् परिमुच्यंतीति परामृतरूपतया प्रा
प्यत्वेन वर्णितः कस्तत्प्राप्त्युपाय इति
प्राप्ते दहर. पि. प्राप्तमिति दहरोपास
नमारब्धं ~~[illegible]~~ ततस्मिन् यदंतस्त
दुपासितव्यमिति दहरपुंडरीके यद्व
स्तु तद्वस्तु तदुपास्यमिति सामान्येन-
उक्तं तत्किमित्याकांक्षायां यः परः स

महेश्वर इति महेश्वराख्यं तदुपवर्णितः किं रूपमित्याकाङ्क्षायां ऋतं सत्यमित्यादिना विरूपाक्षत्वादि लक्षणरूपमित्युपसंहृतं। तत्तार्यान्तर वाक्य सिद्धो नारायणः पूर्वाधिकरण न्यायात् उपासकत्वेनान्वेतीति युक्तं अत्र सर्वेषामुपासनेऽधिकारस्य सद्भावेऽपि नारायणग्रहणमस्याधिक्यार्थं तद्दिहोपास्येन विरूपाक्षेण ब्रह्मणा तदुपासकस्य नारायणस्याभेद भावनया तद्धर्मैरस्य प्रतिपादनं उपादानस्य तदात्मन इति समीचीनम्॥

॥ अत्ता चराचरग्रहणात् ॥

32A यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनो। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति श्रूयते स्य विषयः इह मृत्युपसेचनमिलितं ब्रह्म क्षत्रोपल

क्षित निखिल चिदचित्प्रपंच कबळीभू, भो
कृतया श्रूयमाणः परमेश्वरः अन्यो
वेति संशयः परमकारुणिकस्य सर्वानु
ग्राहकस्य संकलभक्षकत्वमनुचितम्.
हिंसारूपं हि प्राणविमोचनम्. हिंसाप्र
वृत्तेः क्रोध एव मूलाङ्कुरः क्रोधस्यामं
गलगुणस्य क्रोधएव मूलकन्दः. तस्य
सर्वसंसारनिदानस्य तमएव प्रकृतिः-
अतस्तामसस्सर्वसंहर्ता. तामसत्वं नामा
वृत ज्ञानादिमत्त्वं, निष्प्रकारकत्वं सर्व
संहर्तृ ब्रह्मेत्युक्ते तस्य नित्यशुद्धस्य-
निरवधिक मंगळाकारस्य निस्संसारक
ळकस्य अज्ञानतमो मोह क्रोधादिकामं
गळगुण संकरप्रसंगः - स्वरूपलक्षण
तया निर्णीतं सर्वज्ञत्व नित्यत्व प्रत्वादिक
मनर्थकमेव स्यात्. तस्मात् ब्रह्मो

न्यें[illegible] एत्ता इह गुणसंहर्ताभवतीति-
पूर्वःपक्षः सिद्धांतस्तु ब्रह्मैव संहर्तृत्वे
न श्रूयते कुतः चराचरग्रहणात्- यद्धु
क्तं निखिलचराचरप्रपंचभोक्तृत्वमयुक्त
32. 13. मिति तदेव ब्रह्मत्वलक्षणं परिच्छे
त्तुं शक्यं जीवस्य सकलचराचरग्रहण
सामर्थ्याभावात् तस्मादुपसंहर्ता महात्मा
सायबैनमः इति परमेश्वरस्याप्यनेका
रासि श्रूयते संहर्तृभावः न कृचिज्जी
वस्य यइमा विश्वा भुवनानि जुह्वदि
ति ब्रह्मणो निजप्रकाशवह्नौ निखिल
भुवनहव्यस्य भोक्तृत्वमवगम्यते -
नचैवमस्तिजीवस्य सामर्थ्यं ह्यव्यक्तो
ऽति निविडस्य स्वेतरमखिलं चराचर
चिदचित्प्रपंचं स्वात्मनि संहृत्य यदा
वर्तते परमेश्वरस्तदा सर्वमिदं निरस्त

चन्द्रसूर्यादिप्रकाशतया विद्यते रात्रि
दिनादिकालविभागं अपगतनामरूप
विशेषतया स्थूलसूक्ष्म देवमनुष्या
दिव्यवहारशून्यं तमोमात्रं वर्तते
स एक एव परमेश्वरो निरङ्कुशप्रका
शः सर्वसाक्षी तदानीमपि परिशि
ष्यते। तथाहि श्रुतिः - यदा तमस्तन्न
दिवा न रात्रिर्न सन्न चासच्छिव एवके
वलः इति अत्र न सन्न चासदिति सद
सतोः पशुपाशयोः न स्वरू
पसत्ता निषिध्यते किंतु नामरूप विभा
गाहं स्थूलत्वं - ननु नित्यप्रकाश-
शिवे परब्रह्मणि सत्यपि कथं तमो
..यं जगदिति चेन्न स्वयंप्रकाशं
२२: A स्य सर्वसाक्षिण शिवस्य का हानिः
नामरूप शून्य ...... ग्राहणायोग्येषु

विषयेषु विहृत करण शरीर शक्तीनां-
जीवानाम(म्) प्रपञ्च ग्रहणं नास्ति-
मलतिरोहित स्वज्ञानतया जीवस्य स्व
प्रकाश रूपस्यापि पूर्वमिव दर्शनं ना
स्ति. तस्मान्निरस्त समस्त कार्य विशे
षा परामर्श सुषुप्तिमपि महावस्था.
तं इत्युच्यते. तथाहि श्रुतिः - आ
सीदिदं तमोभूतं प्रज्ञातलक्षणं इति
नामरूप विभागानर्ह सूक्ष्म चिदचि
त्प्रपंच शक्ति विशिष्टतया जीवः केवल
इत्युच्यते. स पुनस्सर्गकाले स्व संक
ल्पमात्रेण समवायिकारण निरपेक्षमेव
स्वस्मात् परम शक्ति परिस्फुरण पूर्व
पूर्व तत्तन्नाम विशिष्टमेव सकलं चि
दचिद्वर्ग जातं सृजति प्रकाशयति. त
थाभियुक्ताः, चिदात्मैव हि देवोन्तः

न मिथ्यावस्थाद्वहिः। योगीव निरुपा
दानमर्थं ज्ञानं प्रकाशयेत्॥ इति। ननु
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं
मिति। तस्माद्विराडजायत इति श्रुत्या-
मायापुरुषयोरुपादानत्वं श्रूयते कथं
निरुपादानत्वमिति चेत् सत्यं। यथा
३३-१३ घटनिष्पत्तेः १ कुलालस्य स्वशरीर
स्वरूपत्वेन मृत्पिंड उपादानं इष्य
ते तथा न परमेश्वरात् पृथक्सि
द्धं मायाद्युपादानं मायाद्युपात् परमेश्व
रात् जगदुत्पत्तेरत्र न विरोधः तत्..
स्वरूपापृथग्रूपत्वान् सूक्ष्ममायापु
रुषं परमेश्वरस्यैव स्वयमुपादानमपीत्यु
च्यते। तथाप्यकशिखायां म(?) ख्या
यीते ज्ञानं प्रख्यापितव्यं सर्वमिदं ब्रह्मेति
श्रुतेरेतद्वस्वरूपसूयन्ते सर्वाणि चेदि

याणि सहभूतैर्नकारणं .... रणानां ऋः
ता कारणं तु ध्येय स्सर्वैश्वर्य संपन्न
स्सर्वेश्वरश्शंभुराकाश मध्ये इति श्रू
यते· ततस्सर्व भूतानां यतस्संहारः तत
एवैतेषामुत्पत्तिरिति अनंतानां तेषां या
वत्सं.... ति स्तवेत् ततोवानन्तशक्तो
शिवे स्थितिरिति सर्वसंहर्ता शिव एव·
ब्रह्म शब्दाभिधेयः। यदुक्तं संहारस्य
हिंसारूपत्वात् तन्मूल क्रोधाद्यनर्थ
गुण संबन्धो ब्रह्मणो भवेदिति तदविचा
रविलासः क्रोधादिमूलस्य तमोगुणस्य
प्रा प्राकृत धर्मत्वात् - उमासहाय परमेश्व
रं प्रभुमित्यारभ्य समस्त साक्षिं तम
सः परस्तात् इति श्रुतिरेव भगवती·
३४ प्रमाणं परमेश्वरस्य तमः परत्वे ऽहि· पौरा तमः
णिकीभणितिरपि परमेश्वरस्य मोहादिं

निर.... ज्ञानादीनां म.(मे) नित्य संब
न्धमाह-

ज्ञानं वैराग्यमैश्वर्यं तपस्सत्यं क्षमा धृतिः।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च॥
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे।
इति
अशेषविषया मोघ शुद्ध बुद्धि विजृंभणः।
आत्मशक्त्यमृतास्वाद प्रमोद रसिको युवा॥
इत्यादि- असंकुचित वैभवः परमेश्वरो
हि सिसृक्षुः स्सोऽकामयत बहुस्यामिति स
हृत्प्रपंच भावनया आत्मनो मायालक्षणां मि
च्छारूपां शक्तिं मामायति सतपोतप्यतेति
तपस्स्वरूपिकया ज्ञानात्मिकया शक्त्या सक
लजीवकर्मानुगुण तत्तच्छरीर सामग्री मालो
चयति आलोच्य च संकल्पित संकल्प वि
दग्धया क्रिया शक्त्या इदं सर्वमसृजतेति

इच्छाशक्तिमित्तौ निखिलं जगच्चित्तमुन्मी-
लयति तत्सृष्ट्वा तदेवानुप्राविशदिति स-
कलकार्यजातमनुप्रविश्य शक्तित्रय संक-
लनेन त्रिगुणाभिन्नमूर्तित्रयादि प्रपंचरू-
पो भवति तदिह सर्वज्ञस्य सर्वशक्तेः शिव-
स्य महिमा केन विज्ञायते अतस्सर्वसंहर्ता
परमेश्वर इति ॥

॥ प्रकरणाच्च ॥ ९ ॥

३५.१३ महान्तं विभुमात्मानं मत्वा धीरो न शो- ३५.१३
चति। नायमात्मा प्रवचनेन लभ्य इति। प-
रमेश्वरस्यैव प्रकरणं। अतश्च परब्रह्म
परमेश्वरः सर्वसंहर्ता नान्य इति सिद्धम्॥
इत्यधिकरणे सर्वसंहर्तृत्वलक्षणेन सिद्धस्य
परमेश्वरस्य। द्वा सुपर्णेत्यादि प्रसिद्धं स्व
विभूति जीव साहचर्यमभिव्यंजयि-
तुमिदमधिकरणमारभ्यते।

॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥

ऋतं पिबन्तं सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता इति श्रूयते । अस्य विषयः - इह सुकृतस्थाने परार्ध्ये ब्राह्मणादि शरीरे हृदये गुहां प्रविष्टौ कर्मफलभोक्तारौ छायातपाविव विलक्षणौ कौचित् श्रूयेते तावेतौ बुद्धिजीवौ जीवपरमेश्वराविति सन्देहः - एतौ बुद्धिजीवावेव कुतः ऋतं पिबन्ताविति भोक्तृत्वावगमात् । परमेश्वरस्य न भोक्तृत्वं अनश्नन्नन्यो-अभिचाकशीति इति दर्शनात् बुद्धिजीवयोर्भोक्तृत्वं प्रसिद्धं एवं । किंच जीवपरमेश्वरयोश्चेतन रूपयोः छायातपव...

द्वैलक्षण्यं नास्ति बुद्धेरचेतनत्वात् अ
३६१. स्ति जीवाद्वैधर्म्यं - तदेवं बुद्धि १ जीवावि
ति प्राप्ते ब्रूमः - जीवपरमेश्वरावेव गुहागा
तौ तयोरेव तं दुर्दर्शं गूढमनुप्रविष्टं
गुहाहितं गह्वरेष्ठं पुराणमिति गुहाप्रवे
शदर्शनात् - यदुक्तमीश्वरस्य नभोक्तृ
त्वमिति तदपि न युज्यते - प्राणारामं म
न आनन्दमिति ब्रह्मणो ह्यात्मारामस्य
मनोमात्त विषय स्वरूपानन्द भोगदर्शना
त् तथा पुराणं च
आत्मशक्त्यमृतास्वाद प्रमोदरसिको युवा।
अनन्त परमानन्द मकरन्द मधुव्रतः॥ इत्या
दि जीवस्य स्वकर्मफल भोक्तृत्वं प्रसिद्ध
मेव - एवं च तयोर्भोगस्य साधारणत्वेनश्र
वणेऽपि तत्र विशेषस्समाश्रियते भोक्तृ
विशेषात् - यथा राजभृत्यावन्नं भु-

ज्ञात इत्यत तत्तदुचितानुविशेषः · यदु
क्तं तयोर्न वैषम्यं इति तन्न · यतो नित्यो
नित्यानां चेतनश्चेतनानामित्यादि श्रुत्या
नित्यत्व चेतनत्वादिना जीवेश्वरयोः
स्साम्येपि अनादिमलसंबन्धभावाभा
वाभ्यां वैषम्यं संभवति · ज्ञाज्ञौ द्वावजा
वीशानीशावित्यादि श्रुत्या ज्ञत्वाज्ञत्व
स्वातन्त्र्यास्वातन्त्र्यादि धर्मवैषम्यं चाव
गम्यते · ननु कर्मण्यमेतयोः शरीरसंबंधे
समानेपि कस्यचिदज्ञत्वादिकानर्थसं
३९ 13 बन्धः कस्यचिदनर्थाभाव इति · चेन्न
सुखदुःखयोर्नैकाश्रयत्वं प्रयोजकं ·
किंतु स्वातन्त्र्यास्वातन्त्र्यमेव । तथाहि
श्रुतिः - समाने वृक्षे पुरुषो निमग्नोऽनी
शया शोचति मुह्यमानः जुष्टं यदा पश्यत्य
न्यमीशमस्य महिमानमिति वीतशो

क इत्यादिश्रुत्या- अस्यास्सांपदार्थिकोर्थः
जीवोयं अनादिना कर्मनिगळेन बद्धः त
त्कर्मभोगानुगुण मायामय कळेबर प्रवि
ष्टो दुर्वार तापसंघात मनुभवन्न अनीश
या शोचति मुह्यमानः पारवश्येन मुह्यमा
नइत्यर्थः तद्व्यपोहितुं कुशलएव मुह्य
मानश्शोचति· महामोह निबंधन शोकज
लधिमग्नो वर्तते· स्वपोरकतया
स्वजुष्टं सर्वानुग्राहकमीशं उमासहितं य
दासौ पुनरस्य प्रसादेन पश्यति· अप·
रोक्ष्येण जानाति· तदास्य महिमानं नि
रतिशय मपहतशोकस्सन् प्राप्नोतीति·
अतः स्वतंत्रस्यानादिमुक्तस्य शरीरसं
बन्धे समानेपि जीववन्न तत्कृत दोषा
पत्तिः· तस्माज्जीवपरमेश्वरौ गुहागतौ।।
पुनरनुपपत्तिमाह-

॥ विशेषणाच्च ॥

जीवपरमेश्वरावस्मिन् प्रकरणे विशेष्ये
ते न जायते नम्रियते वा विपश्चिदित्यादि
ना जीवः . अणोरणीयान् महतो मही
३६A याणं न इत्यादिना परमेश्वरः एतद्विशे
षणं जीवबुद्धिपरस्थे कथं संभवति अतो
जीवपरमेश्वरावेव गुहां प्रविश्य प्रेर्य-
प्रेरकभावेन शरीरशरीरिभावेन स्थिते
ताविति निर्णयः॥ हृदयगुहागततया उपा
स्यस्य परमेश्वरस्य इहोपासनस्था
नांतरमुच्यते -

॥ अंतर उपपत्तेः ॥

छान्दोग्ये श्रूयते स्यविषयः . य एषो
ऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवा
च एतदमृतमेतदभयमेतद्ब्रह्मेति .
इत्यादि इहामृतत्वादिलक्षणो श्रूयते

यमाणः पुरुषः ईश्वरोऽन्यो वेति संशयः
परमेश्वरादन्य इति वदामः - परमेश्व
रस्य दहरं विपाप्मं पद्मकोशप्रतीकाश
मित्यादिषु हृदयपुंडरीक एव सन्निधानं
श्रावणात् जीवस्यतु रूपादिग्राहणे चक्षुरि
न्द्रिय प्रवेशोस्ति मनस्संबन्धात् स एवाक्षि
पुरुषः छायापुरुष इति प्राप्ते निरूप्यामः
परमेश्वर एवाक्ष्यन्तः पुरुष इति निरुपाधि
कामृतत्व भयत्वादीनामस्मिन्नेवोपपत्
तेः॥ यदुक्तमक्ष्यन्तःस्थितिरीश्वरस्य
नयुज्यतेति तत्राह-

॥ स्थानादिव्यपदेशाच्च ॥

.. यश्चक्षुषि तिष्ठन् यश्चक्षुषोऽन्तरः यं
चक्षुर्न वेद यस्य चक्षुः शरीरं यश्च
3६।13 क्षुरन्तरो यमयति एष आत्मा अन्तर्याम्य
मृत इति श्रुत्या चक्षुःस्थितिनियमनादिक

मीश्वरस्य व्यपदिश्यते अतः परमेवाय मीश्वरः इतीच्छाया पुरुषपक्षे पुनर नुपपत्तिमाह-

॥ सुखविशिष्टाभिधानादेव च ॥

ननु कं ब्रह्म खं ब्रह्म इति पूर्वमस्य सुख विशिष्टतयाभिधानादेवायमीश्वरः न ह्रीच्छायापुरुषे सुखसंभवः - यदुक्तं अक्षि पुरुषस्य जीवरूपत्वं तत्राह-

॥ अत एव स ब्रह्म ॥

यतएव भवभयातीताय उपकोसलाय ब्रह्म जिज्ञासवे कं ब्रह्म खं ब्रह्म इत्युपक्र म्योपदिष्टं - यद्वाकं तदेव खं यदेव कं तदेव खमिति - अतएव खशब्दा भिधेय आकाशः परमेव ब्रह्म - किमी दृशोपपत्तिरस्ति जीवस्य नहि जीवे निर

तिशय सुखसंभवः अतो यदेव पूर्वं... प-
रिच्छिन्न सुखरूपतया प्रकृतं ब्रह्म तदे-
वाक्ष्याधारतया प्रतिपाद्यत इति अक्ष्यं-
तः पुरुषः परमेश्वरः -- पूर्वपक्षे पुन
रियं ह्यनुपपत्तिरित्याह-

॥ श्रुतोपनिषत्क... गत्यभिधा
नाच्च ॥ (१६)

श्रुत ब्रह्म स्वरूपाणां माध्यमान्तव्या या अ
र्चिरादि गते र्श्रुतिरपि पुरुषं श्रुतव
तो विधिमेवामे सं भवन्त्यर्चिषोह
रहः इत्यादि तत्पुरुषो मानवस्स एनान्
३०A ब्रह्म गमयति एष देवपथो ब्रह्मपथः
एतेन प्रतिपाद्यमाना इमं मानवं आवर्
तं नावर्तन्ते नावर्तन्ते इत्यं तेभिधा
नात् नासौ जीवः छायापुरुषो वा किं
तु ईश्वर एव ॥-

॥ अनवस्थितेरसंभवाच्च नेतरः ॥
अस्य महोपनिषदि श्रूयतेस्य विषयः
अंगुष्ठमात्रः पुरुषो ईशं च समाश्रितः - ईशः
सर्वस्य जगतः प्रभुः प्रीणाति विश्व
भुक् इत्यादि इहांगुष्ठमात्रत्वादि विशि
ष्टः परमेश्वरोन्यो वेति संशयः प्राणाग्नि
होत्र प्रकरणात् अंगुष्ठमात्र इति अल्पत्व
व्यपदेशात् च अयं प्राणवायुरेव पंचानां
प्रवृत्तीनां भोक्तावगम्यते न च भोक्तृत्वा
नुपपत्तिः आपश्च पृथिवी चान्नम
त्तारौ वह्निमारुतावित्यादिषु वायोरपि
भोक्तृत्वसिद्धेः - सर्वज्योयं प्राणवायुरिति
पूर्वः पक्षः - परमेश्वर एवेति सिद्धान्तः -
सकल जगदीशितृत्व विश्वभुक्त्वादीनां
धर्माणां अन्यत्राभिधानं अनवस्थाना
त् असंभवाच्च तत्तेषां अतद्रूपत्वे

तादृशः तस्य प्राणरूपत्वेनाप्युपास्यत्वमु
च्यते - प्राणानां ग्रन्थिरसि रुद्रो मा विशां
तक इति - प्राणाधारत्वेन तस्य श्रावणात्
अंगुष्ठमात्रः परिणामस्य उपास्यत्वाद्
3.6 13. विशेषः - प्राणवायोः १ भोक्तृत्वसिद्धव
पि विश्वभोक्तृत्वे त्वेतन्न संभवति - अ
तोयमीश्वर एव प्राणाग्नि होताराध्यत्वे
न प्राणरूप उपपाद्यत इति - सर्वज्ञस्य
सर्वशक्तेः सर्वानुग्राहकस्य विभोरपि
शिवस्य परब्रह्मणः सवितृमंडल पुरुष
हृदय पुण्डरीकादिषु उपासनया स्थितिरुप
पादिता - सर्वतामुपपादयितुमिदम
धिकरणमारभ्यते -
।। अन्तर्याम्यधिदेवाधिलोका-
- दिषु - तद्धर्मव्यपदेशात् ।।

अन्तर्यामि ब्राह्मणस्य विषयः श्रूयते- यः
पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृ
थिवी न वेद यस्य पृथिवी शरीरम् (म्)
यः पृथिवीमन्तरो यमयति एष त आत्मा
अन्तर्याम्यमृत इतीत्येवं पृथिवीमार
भ्य प्रतिपर्याय मव्यक्तान्तं तत्पर्यन्तम
खिलवस्त्वन्तर्यामितया श्रूयमाणः पर
मेश्वरो जीवो विराट् पुरुषो वा प्रधानं
वेति संशयः स्वोपार्जित विविधकर्म
फलभोगाय सकलभूतेन्द्रियानुप्रवे
शो जीवस्य युज्यते- सकलचेतनोपाद
नतया सर्वभूतानुप्रवेशो विराट् पुरु
षस्य युक्तः अथ- महदादिरूपेण परि
णतत्वात् प्रधानस्य सर्वव्यापकत्वमु
चितं- विश्वाधिकोरुद्रो महर्षिरिति-
३८४. विश्वाधिकत्वे । न निखिल विश्वोत्ती

र्णस्य परमेश्वरस्य विकाररूप प्रपंचानु-
प्रवेशेन घटते ततः परमेश्वरमंतरेण-जी
वादि-प्रेरकत्वम् स्यादन्तर्यामीतिपूर्वपक्षे
प्राप्ते ब्रूमः। पृथिव्या: सर्वात्मतया अनु
प्रवेशदर्शनात्। एवंत, आत्मान्तर्याम्यमृतइ
ति शिव एवानादिमुक्तो मृतइत्युच्यते एता
नि वामृतस्य नामधेयानीति श्रवणात्। य
च्च विश्वाधिको रुद्रइति विश्वाधिकत्वं पर
मेश्वरस्य श्रूयते सर्वा विश्वरूपत्वमपि स
र्वोवैरुद्रः इत्यादिषु सर्वविकारानुप्र
वेशेऽपि तद्विकारस्पर्शो लेशः नास्तीति खलु
प्रतिपर्याय ममृत शब्द प्रयोगः- अथ
र्वशिरसि च यो वै रुद्रस्सभगवान् भूर्भुवः
स्वः यो ब्रह्मा तस्मै वै नमो नम इत्यादि
ना ब्रह्मविष्णुरुद्रो महालक्ष्मीसरस्वतीगमहा
गणेशस्कन्देन्द्रादिलोकपाल भूरादिसमस्त

लोक[redacted] पृथिव्यादिपञ्चभूत सूर्य सोम
याह नक्षत्र कालादि रूपेण प्रत्येक मभ्या
सतो निरूप्यते परमेश्वरः· तत्रापि सकल
चि[redacted] दचित्तत्वानुप्रवेशादस्य पुरुषार्थ·
संबन्धः भवेदिति शंकायां प्रतिपर्यायमै
श्वर्यादि मंगळ गुण संबन्धाभिधायी भ
गवच्छब्द प्रयोगः कृतः · ततस्सर्वात्मा च
३८.13 शिवः परमेश्वर इति युक्तमेव · यच्चोक्तं
तं प्रधानादीनामन्तर्यामित्व मुचितमिति
तत्परिहरति –

॥·नच स्मार्त मत ... ·र्मा भिला
पाच्छारीरश्च ॥

नच·स्मार्तः प्रधानं अन्तर्यामीति शक्
तं·तस्य विकार जडत्वादि धर्मानभिला
पात्– नशारीरो विराट् पुरुषस्य त
स्य सक··· नियामकत्वाद्यनुपपत्तेः

जीवस्य न भवतीत्यत आह-

॥ उभयेऽपि हि भेदेनैनमधीयते ॥

उभये मू.. काण्वमाध्यन्दिनशाखिनश्च यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन् इत्यादिना जीवादन्तर्यामिणम्.(म्) भेदेनाधीयते. अतः परमेश्वरस्यैव सकलान्तर्यामित्वम्.(म्) न प्रधान विराट्पुरुष जीवानाम् इति सिद्धम्॥

इह प्रत्यक्ष पृथिव्यादि रूपत्वेन प्रतिपादितस्य परमेश्वरस्य तद्वदृश्यत्वादिकं नास्तीति प्रतिपादयितुमिदमधिकरणमवतार्यते.॥

॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥

अथ परा :- या तदक्षरमधिगम्यते-

यत्तदद्रेश्यं अग्राह्यं गोत्रं वर्णं चक्षुश्रोत्रं
तदपाणिपादं नित्यं विभुं सर्वगतं
सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परि
पश्यन्ति धीरा इति श्रूयते तस्य विषयः
अत्राक्षरं प्रधानं जीवः परमेश्वर इवे
ति सन्देहः प्रधानमत्राक्षरं तस्यम
२९ A हदादिपरिणामिनो भूतयोनित्वसं
भवात् अथवा जीवः तस्य, क्षरप्र
धानमभृताक्षरं इति श्रुते रक्षरशब्द
वाच्यत्वमुचितं स्वकर्मवशेन महाभूत
योनित्वं च अतस्तयोरन्यतरदक्षरमि
ति प्राप्ते ब्रूमः परमेश्वरएवाक्षरं य
स्सर्वज्ञस्सर्ववित् यस्य ज्ञानं ~~यं तप~~ नमयं तप
इत्यादिना तद्धर्मोपपत्तेः नहिपरमे
श्वरादन्यस्मिन् सर्वज्ञत्वादिकं संभवति
यदुक्तं भूतयोनित्वं जीवप्रधानयोर्युक्तमिति

तद्युक्तं तयोरचेतनासर्वज्ञयोस्तत्साम
र्थ्याभावात्- पुनरत्र जीव प्रधानयोर
नुपपत्तिमाह-

।। विशेषणभेदव्यपदेशाभ्यां च ने
तरौ ।।

अत्र एकज्ञानेन सर्वविज्ञानं प्रतिज्ञायते-
कस्मिन्नु भगवो विज्ञायते सर्वमिदं विज्ञा
तं भवतीति- तच्च न्यच्चैवं रूपं विशे
षणं तद्व्यपदेशाच्च न प्रधानमक्षरः
अक्षरात्परतः पर इति जीवाद्भेदव्यप
देशाच्च न जीवः ।।

।। रूपोपन्यासाच्च ।।

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दि
शः श्रोत्रे वाग्विवृताश्च वेदाः- वायुः
प्राणो हृदयं विश्वमस्य पद्भ्यां पृथि
वी ह्येष सर्वभूतान्तरात्मेति अक्षरस्य

त्रैलोक्यरूपत्वमुच्यते अतस्य सकलात्मा परमेश्वर एवात्र वैश्वानर शब्दाभिधेयः -

२९। 13. प्राणाद्यावर त्वेन पूर्वमुपास्यत्वे । तस्य पुनर्जाठराग्निरूपेणोपास्यत्वमाह

॥ वैश्वानरस्साधारणधर्मविशेषात् ॥

य स्त्वेत मेवं प्रादेशमात्र मभिविमान मात्मान मात्मानं वैश्वानरमुपास्ते स सर्वेषां लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्न मत्ति इत्यादिकं छान्दोग्ये स्य विषयः श्रूयते - अत्रोपास्यतया उक्तो वैश्वानरः परमेश्वरोऽन्यो वेति संशयः पूर्वपक्षन्यायस्तु वैश्वानर शब्देन जाठराग्निरुच्यते, अयमग्नि वैश्वानरो येनेदम [illegible]-

न्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति अयमेतत् कण्ठादि विवृत्य शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति इति जाठराग्नौ प्रयोगदर्शनात् महाभूततृतीयोऽग्निर्वा स्यात् एषवा अग्नि वैश्वानर इत्यादौ वैश्वानरशब्दस्य तत्र प्रसिद्धत्वात्. अग्निदेवतावा स्यात् वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात इत्यादिषु इष्टदेवतात्वेन फलदातृत्वदर्शनात्, नतु परमेश्वरः पादेशमात्रमिति परिच्छेदावगमादिति. अतोच्यते परमेश्वर एव वैश्वानरः कस्मात् वैश्वानरस्य शब्दस्य साधारण्येऽप्यस्मिन् प्रकरणे. कोनः आ
४०A त्मानमेवं वैश्वानरं सं १ प्रत्यध्येषि तमेव नो ब्रूहीत्यादिषु परमेश्वरासा

धारण ब्रह्म शब्दादिभि र्विशेष्यमाणत्वात् न जाठराग्न्यादिषु तद्वृत्तिः संभवति- अतः परमेश्वर एव वैश्वानरः -परमेश्वरपक्षे प्रमाणान्तरमाह

॥ स्मर्यमाणमनुमानं स्या-दिति ॥

अग्नि र्मूर्धा चक्षुषी चन्द्र सूर्यौ इत्यादिषु परमेश्वरस्य द्युलोकादि पृथिव्यन्त रूप मुक्तं तदित्थं मूर्तं रूपमेहं तस्यहवा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा श्चक्षु र्विश्वरूपः प्राणः पृथग्वर्त्मा सन्देहो बहुलो बस्तिरे रयिः पृथिव्येव पादा वित्यत्र प्रत्यभिज्ञायमानं तस्य परमेश्वरत्वे लिङ्गम्॥

॥ शब्दादिभ्योऽन्तः प्रतिष्ठाना-

- प्रे न्नेति चेन्न तथा दृष्ट्युपदे -
- शादसंभवात्पुरुषमपि चैनमधी
यते ॥

स एषोऽग्निर्वैश्वानरः हृदयं गार्हपत्यो
मनोऽन्वाहार्यपचनः आस्यमाहवनी
यं तद्यद्भक्तं प्रथममागच्छेत् तद्धो
मीयं स यां प्रथमामाहुतिं जुहुयादि
त्यादिषु प्रतिपन्नेभ्यः अग्निशब्दा
दितत्र कल्पना पाणाहुत्याधारत्वेभ्यः
स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं
पुरुषेन्तः प्रतिष्ठितं वेद इति श्रुता
त् पुरुषेन्तः प्रतिष्ठितत्वलिङ्गाच्च
जाठराग्निरेव नासौ परमेश्वर इति चे
४०१३ न्न । जाठराग्निरूपतयोपास्यत्वेनउ
पदेशात् केवलस्य जाठराग्नेः त्रैलोक्य
रूपशरीरत्वाद्यसंभवात्. किंच सप

कोग्नि वैश्वानरः यत्पुरुष इत्येनं वैश्वानरं पुरुषमप्यधीयते वाजसनेयिनः- निरुपाधिकपुरुषशब्दवाच्यस्तु परमेश्वर एव- तेनेदं पूर्णं पुरुषेण सर्वमिति श्रवणात् परमेश्वर इति युक्तं॥
॥ अत एव न देवता भूतं च॥
यतोयं वैश्वानरस्त्रैलोक्यशरीरकः पुरुषशब्दवाच्यश्च स अत एव न देवताग्निर्न तृतीयं भूतं च॥ इहजाठराग्निरूपतयोपास्यत्वेन सिद्धं परमेश्वरस्याग्निशब्दवाच्यत्वं तद्योजनाभेदमाचार्यान्तराणां दर्शयति-
॥ साक्षादप्यविरोधं जैमिनिः॥
जीवरूपमग्निरूपतयोपास्यत्वादेवेदमग्निशब्दसामानाधिकरण्यं- अग्रनयनादियोगेन परमेश्वरस्याग्निशब्द

स्य साक्षाद्वृत्तिसंभवादिति सामाना
धिकरण्यं जैमिनिरुवाच ॥
(:ष्म:)
॥ अभिव्यक्तेरित्याश्मरथ्यः ॥
अस्यैतमेव प्रादेशमात्रमिति अपरिच्छि
न्नस्य द्युप्रभृति पृथिव्यंत प्रदेशसं
बन्धिन्या मात्रया परिच्छिन्नत्वमुपास
काभिव्यक्त्य इत्याश्मरथ्यमुनिः-
॥ अनुस्मृतेर्बादरिः द्युप
भृति पृथिव्यंतस्य मूर्धादिपादावय
वकल्पनं अनुस्मृतये प्राज्ञ
३१॥ त्यवर्ण्यं इति बादरिः -
॥ संपत्तेरिति जैमिनिस्तथाहि
दर्शयति ॥
उरएव वेदिर्लोमानि बर्हिर्हृदयं
गार्हपत्यः मनोन्वाहार्यपचनः -
आस्यमाहवनीय इत्युपासकस्योरः प्रभृ

तीनां वेध्या हित्वकल्पनं विध्याद्भूतायाः प्राणाहुते स्यने होत्वकल्पनाथमिति जैमिनिः तथा हि श्रूयते श्रुतिः अथय एवं विद्वान् अग्निहोत्रं जुहोतीति ॥

॥ आमनन्ति चैनमस्मिन् ॥

तैत्तिरीये एनं परमेश्वरमीश्वरमस्मिन्नुपासक शरीरे प्राणाहुति वेलायां - भोक्तृतया शिवोमा विशाधारार्थं इति प्रभुः प्रीणाति विश्वभुगित्याम नन्ति अतस्सकलाचार्य मतेन न्यायेनच जाठराग्नि रूपेण परमेश्वर एवाराध्यः प्राणाग्नि होत्रेणेति समीचीनम् ।

इति.

श्रीकण्ठशिवाचार्य विरचिते ब्रह्ममीमांसा भाष्ये प्रथमाध्याय-
-स्य द्वितीयः पादः ।

इहपादे स्पष्टास्पष्टब्रह्मलिङ्गानां वेदान्तवाक्यानां विचारः। प्रसङ्गाद्धिकरणं च क्रियते -

॥ द्युभ्वाद्यायतनं स्वशब्दात्॥

यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतम् न सह प्राणैश्च .... स्तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यै
४१ 13. ष सेतुः इति ..... विषयोऽस्य श्रूयते मुंडकोपनिषदि। अत्र द्युभ्वाद्याधारतया श्रूयमाणः परमेश्वरो वान्यो वेति संशयः। परमेश्वरोऽन्यो वायुरेव द्युभ्वाद्याधार इति गम्यत इति वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च संदृब्धानि भवन्तीति श्रुतौ तस्य सर्वाधारत्वः सिद्धेरिति प्राप्ते ब्रूमः - परमेश्वर एव द्युभ्वाद्याय

तर्हि तमेवैकं जानथ आत्मानमित्यात्मश
ब्दात् सूत्रात्मनो वायोरस्यात्मशब्द
वाच्यत्वे को दोष इत्यत आह-

॥ मुक्तोपसृप्यव्यपदेशाच्च ॥

यदा पश्यः पश्यते रु(५)क्मवर्णं क
र्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान् पु
ण्यपापे विधूय निरञ्जनः परमं साम्यमु
पैति यथा नद्यस्स्यन्दमानास्समुद्रे अ
स्तं गच्छन्ति नामरूपे विहाय तथावि
द्वान् नामरूपाद्विमुक्तः परात्परं पुरु
षमुपैति दिव्यमिति पुण्यापुण्यप्राकृत
नामरूपनिर्मुक्तानां मुक्तानां प्राप्यतया
व्यपदेशाच्चायं परमेश्वर एव कथमे
तद्द्योस्संभवति परमेश्वरात्मक एव
वायुस्सूत्रात्मा पारमेश्वरी ह्यष्टसु मूर्ते
ष्वेकतमत्वात् ततो न वायुरिति [illegible]-

॥ नानुमानमतच्छब्दात्प्राण-
— भृच्च ॥

४२ अनुमानगम्यं प्रधानमेव द्युभ्वाद्या-
यतनं न (नः) तस्य सर्वोपादानत्वादिति ।
न वाच्यं अतच्छब्दात् आत्मशब्दात् ।
न प्राणभृज्जीवस्यानुपपत्तेरिति ॥

॥ भेदव्यपदेशात् ॥

अत्र जीवाद्भेदो व्यपदिश्यते । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति । अतस्ततः परमेश्वर एव द्युभ्वाद्याधारः ॥

॥ प्रकरणात् ॥

अथ परा यया तदक्षरमधिगम्यते इति परस्य खल्विदं प्रकरणं - अतश्चेश्वरः -

॥ स्थित्यदनाभ्यां च ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं प
रिषस्वजाते तयोरन्यः पिप्पलं स्वा
द्वत्ति अनश्नन्नन्यो अभिचाकशीति
वृत्ति – जीवस्य कर्मफलाश (को) नमु
क्त्वा अनश्नत एव दीप्यमानस्याभिधाना
च तस्मात्कर्माणन्तर भूतः परमेश्वर एव
भुमा यायत नमपीति निर्णयः ।। मुक्
ताप्य तया इहप्रतिपादितस्य परमेश्वरस्य
प्राप्तिप्रयोजनं निरतिशय सुखं दर्शयति
।। भूमा संप्रसादादध्युपदेशात् ।।
छान्दोग्ये भूमैव सुखमित्युक्त्वा भूम्नः
स्वरूपमाह यत्र नान्यत्पश्यति नान्य
त् शृणोति नान्यद्विजानाति स भूमेति त
४२. 13 त्र संदेहः परमेश्वरः ... त दन्योवेति
परमेश्वरादन्यः प्राण एव भूमा पूर्वे पुना
मादिषु तत्त्वेषु अस्ति भगवो नाम्नो भूय इति

त्यादिना नारदप्रश्ने सनत्कुमारो वाग्वाव
नाम्नो भूयसी इत्यादिना वागादीनि निर्दि
श्य प्राणस्योपरि प्रश्नप्रत्युक्तिभ्यां विनैव य
तो भूमानमवतारयति अपरमेश्वरः एतत्प्र
सङ्गः अतो भूमा द्राविणः इति प्राप्ते ब्रूमः -
परमेश्वर एव भूमशब्दनिर्दिष्टः संप्रसादा
दध्युपदेशात् संप्रसादो जीवः उच्यते एष
संप्रसाद इति श्रुतेः सचात्र प्राणशब्देन
निर्दिश्यते तस्माद्बुद्ध्यात्मान्तरत्वेन भूमोपदि
श्यते एषतु वा अतिवदति यस्सत्येनातिवद
ति इत्यादिना अतहि पूर्वं सवाएष एवं
पश्यन्नेवं मन्वान एवं विजानन् अतिवादी
भवतीति प्राणवादिनो तिवादित्वमुक्त्वा तदन
न्तरं एषतु वेति तुशब्देन प्राणातिवादिनः
सत्यवादेन आधिक्यप्रदर्शनात् पूर्वाति
वादनिमित्तात्प्राणादेतदतिवादनिमि

तस्य सत्यशब्दाभिधेयस्याधिक्यमध्यवसीय
ते ... एवात्मो भूम गुणविशिष्टः प्रतिपाद्यते अ
थात आत्मादेश इत्यात्मत्वेनाप्यमो वर्ण्यते
अतः प्राणशब्दनिर्दिष्टात् जीवादधिकः आ
त्मा भूमा परमेश्वर एव १.

४३.४ ।। धर्मोपपत्तेश्च ।।

भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नीति
आत्मैव इदं सर्वमात्मतः प्राण आत्मात आ
शेत्यादिना स्वमहिम्नि प्रतिष्ठितत्व सर्वात्मत्व
सर्वकारणत्वादयो धर्मा उपदिश्यन्ते, तेषां
परमेश्वर एवोपपत्तिः न प्राणशब्दादिते.
ब्रह्म साद्दश्यमभिहितं. ततः ब्रह्मणस्सादृश्य
मुपगता मुक्तात्मानः तत्प्रत्यगमुत्तावर्त
न्त इति सिद्धं : यत्र नान्यत्पश्यति नान्य
च्छृणोति नान्यद्विजानाति स भूमेति भू

- भूमशब्दवाच्ये ब्रह्मणि इष्टे तन्निष्ठभेदप्रपञ्च
दर्शनात् इति निषेधः क्रियते कथमिहसौ
शत्यमितिचेत् भूम्नि प्रत्यक्षे नान्यत्पश्य
तीत्यादेः रयमभिप्रायः निरतिशय सुखस्व
भावे यस्मिन् साक्षात्कृते सुखातिशयाभिलाषे
ण रूपादि विषयदर्शनादौ न प्रवर्तते.
तन्मग्नः पुरुषः स भूमा ब्रह्मेति ब्रह्मान
न्द लव परमाणवो हि विषय सुख
विशेषाः - तथाहि श्रुतिः एतस्यैवानन्द
स्यान्यानि भूतानि मात्रामुपजीवन्तीति-त
स्मादिह न ब्रह्मणि द्वैत निषेधः प्रसक्तिः -
प्रपञ्चः सत्ये... कथं मुक्तात्मनां अपुरु
षार्थस्य तस्य दर्शनं परिह्रियत इति न
विचार्यं नहि मुक्तानां प्राकृतप्रपञ्चो दर्श
४३७ न विषयः किंतु निरतिशयानन्दस्व
रूपं ब्रह्मैव प्रपंचाकारेण दर्शनगोचरोभ

वति. तथाहि श्रुतिः एतत्तज्ज्ञो भवति आकाशशरीरं ब्रह्म सत्यात्म प्राणारामं मन आनन्दमिति आप्नोति स्वाराज्यं आप्नोति मनसस्पति मित्यादिना मुक्तात्मा प्रस्तुतः- तस्य वाक्पतिरित्यादिना स्वाधीना प्रकृति विरुद्ध वागिन्द्रियादि संबन्ध उक्तः तस्य पुनस्तादृशस्य तत स्तादृशावस्थाप्राप्यनन्तर मेतद्दृश्यमानं प्रकृत प्रपञ्चजालं आकाशशरीरं चिदंबर प्रकाशशरीर ब्रह्मैव भवतीति तात्पर्य रहस्यार्थः अमी मुक्तानां ब्रह्मणा सादृश्यं तत्सः रसीभूत प्रपञ्च दृष्टित्व मिति सर्वं समीचीनं.

॥ उपक्रम र म कूबरान्त श्रुतेः ॥

बृहदारण्यके श्रूयते स्य विषयः. एतद्वै तदक्षरं गार्गि ब्राह्मणा भिवदन्ति अस्थूल मनण्वह्रस्वं दीर्घं लोहितं स्नेहं छाय

मित्यादि। अतोऽक्षरशब्दवाच्यस्त्रेधा सन्दि
ह्यते। ~~[illegible]~~ प्रणवो जीवः परमेश्वरो वे
ति। प्रणवजीवयोरन्यतरएव ~~[illegible]~~ वाऽक्षर
शब्दवाच्यः। कुतः। क्षर शब्दस्य वर्णप
र्यायत्वात् प्रणववाचकत्वमुचितं पुरुषोऽक्ष
र उच्यत इति पुरुषशब्दस्यापि तदभिधे
४४A यत्वमुक्तं। ...तस्तावेवाक्षरशब्दवाच्या
विति प्राप्ते ब्रूमः। अत्ताक्षरं परं ब्रह्मैव।
कुतः अम्बरान्तधृतेः। यदूर्ध्वं गार्गि दिवो
यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी
इमे यद्भूतं च भवच्च भविष्यच्चेत्याद्
चक्षते आकाश एव तदोतं ...ं च प्रोतं चे
ति सर्वविकाराधारतया निर्दिष्ट आका
शः कस्मिन्नोतश्च प्रोतश्चेति गार्ग्या पृ
ष्टे एतद्वै तदक्षरं गार्गि ब्राह्मणा अ
भिवदन्तीत्यादिना एतस्मिन् खल्वक्षरे

गार्ग्यकाश ओतश्च प्रो..तश्चेत्येतेन याज्ञ
वल्क्यवचनेन निर्दिष्टस्याक्षरस्याम्बरान्त
धर्पेच धृतिरवगम्यते। कथमेतदन्यत्र पर
मेश्वरात् संभवति। अतः परमेश्वर एव अक्ष
रशब्दाभिधेयः

॥ सा च प्रशासनात् ॥

सा च धृतिरेतस्यैवाक्षरस्य प्रशासने गार्गि
सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिना
प्रकृष्ट शासन —— नावगम्यते। तज्जगच्छा
सनं न जीवस्य संभवति एक एव रुद्रो
न द्वितीयाय तस्थुः इति जगच्छासने पर
मेश्वरस्य द्वितीयाभावश्रावणात्। अतः पर
मेश्वर एवाक्षरनामधेयः॥

॥ अन्यभावव्यावृत्तेश्च ॥

अन्यभावव्यावृत्तिरपि तदक्षर गा
४४ B. र्ग्य दृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं

मन्त्रः अविज्ञातं विज्ञातृ इति वाक्यशेषः ।
परमेश्वरादक्षरस्यान्यभावं व्यावर्तयति ।
प्राणजीवपक्षयोरक्षरत्वविशेषितद्रष्टृत्वा
द्यसंभवात् । अतः परमेश्वरो अक्षरमिति नि
र्णयः ॥ प्रत्यक्षादिप्रमाणातीतस्यापि परमे
श्वरस्य परमकरुणावशात् उपासकप्रत्यक्ष
त्वमुपपादयितुमिदमधिकरणमारभ्यते ।
॥ ईक्षतिकर्मव्यपदेशात्सः ॥
अस्य वि — : प्रश्नोपनिषदि श्रूयते । यः
पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण पर
म पुरुषमभिध्यायीत स तेजसि सू
र्ये संपन्नो यथा पादोदरः त्वचा वि
निर्मुच्यते एवं हैव सर्वपाप्मना विनिर्मुक्तः
स .... रुन्नीयते ब्रह्मलोकं स एतस्मा
त् जीवघनात् परात्परं पुरिशयं पुरुष
मीक्षत इति । अतः ईक्षतिकर्मत्वेन श्रूयमा

णः परमेश्वरो न्योवेति संशयः नासौ परमे
श्वरः हिरण्यगर्भ एव स — भिरुन्नी
यते ब्रह्मलोकमिति तल्लोक प्राप्ति श्रावणा
त्‌ः परशब्दस्य जीवोत्कृष्टे तस्मिन् संभ
वात् ॥ अथवा नारायणः तस्य पुरुष शब्द
वाच्यत्वात् जीवघनात् हिरण्यगर्भात्
१६८A परत्वोपपत्तेश्च तस्मिन्नेव प्रणवशब्द
वाच्यत्व प्रसिद्धेश्च · तद्विष्णोः परमं पदं
सदा पश्यन्ति सूरयः इति तत्पदस्यैव वि
द्वदनुभव विषयत्वाच्चेति प्राप्ते ब्रूमः ई
क्षति विषयः परमेश्वरः - उत्तरत्र तमो
ङ्कारेणान्वेति विद्वान् यत्तच्छान्तं अज
ममृतं अभयं परं चेति तद साधारण धर्मो
तत्वादि धर्म व्यपदेशात्‌ः न हिरण्यगर्भे
तत्कार्ये शान्तत्वादिकमस्ति ब्रह्मलोकमिति
परब्रह्मणः शिवस्य लोकः प्राप्यतया व

गम्यते - जीवघनइति जीवसमष्टिरूपो हिरण्यगर्भः तस्मात् परात्परं हि ध्येयम् तदुच्यते. ततो हिरण्यगर्भपक्षो नयुक्तः - नारायणइति यदुक्तं तद्विचार्य. अमृतं भूयं परज्योति नित्यमुक्तभाव हेतुत्वं विश्व [illegible] विकततया परत्वं च कथमस्मिन्नुपपद्यते विश्वरूपोऽसौ - कथमेतदुपपद्यते य जीवघनात् हिरण्यगर्भादपि परात् परं. नारायणात् परमुत्कृष्टं पुरिशया नं अन्तर्यामितया अतएव पुरुषं ब्रह्म तदुपासकः साक्षात्पश्यतीति वर्णितं - नारायण परं ब्रह्म तत्त्वं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपाक्ष भूय इतिश्रूयते. तस्मात्पुरिहृत्पुण्डरीके वर्तमानतया

४६७ पुरुषं शब्दवाच्यं तस्य प्रकृतिलीनस्य यः परस्सम्महेश्वर इति श्रुत्या प्रणवाभिधे

यं नारायण परं ब्रह्मेति श्रुत्या नाराय
णा... विश्वरूपाद्भिविकं वीक्ष (वाक्) म
नस विपर्यास रहितत्तया अतः सत्यं सिलो
च्चनतया विरूपाक्षं परमशक्त्या प्रणवव
र्णव्यत्यास रूपो माशब्दवाच्यतया शब्द
कारत्वेन कृष्ण पिङ्गळं सर्वाति शायि ब्रह्म
परात् परम पुरुष मीश्वत इति ईक्षति
कर्मत्वेन व्यपदिश्यते इति। यदुक्तं तद्विष्णोः
परमं पदमिति तत्प्रपंचाकारत्वमंतरे
ण यन्निरति शयानन्द स्वभावं विष्णोः
परमं परं रूपं तदेव शिवाभिधेयं
परं ब्रह्म इत्यविरोधः यतो विष्णुशिव
योरुपादान निमित्त योरवस्था भेदमं
तरेण स्वरूप भेदो नास्ति॥ तदिह ह
रिविरिञ्च्यादि पदोच्चोत्तीर्णस्यापि सा
धकानुग्राहाय पुरिशयानतया पुरुषस्य

परमशक्तिरूपो मायाबलितस्य विरूपाक्षस्य परब्रह्मणः साक्षात्कारः सकलसंसारनिवृत्तिपूर्वं तत्प्राप्त्यै तदुपासकानां तद्वाचकप्रणवपराणां भवतीति निरूपितं तस्य परिशयनमुपासनं च प्रकाशयितुमिदमधिकरणं प्रस्तूयते -

॥ दहर उत्तरेभ्यः ॥ -

४६ A - छान्दोग्ये स्य विषयः श्रूयते । ......
.... स्मिन् ब्रह्मपुरे दहरपुण्डरीकं वेश्म दहरोऽस्मिन् अंतराकाश स्तस्मिन् यदंत स्तदन्वेष्टव्यं तद्वाव (प्रि.) जिज्ञासि वितव्यमिति - दहरशब्देन इह भूताकाश इत्युच्यते उतजीवः परमेश्वरो वेति संशयः -
आकाशशब्दस्य रि(ल)ढत्वा(?)(ल) ति रूढत्वात् भूताकाशो दहरः अथवा: दहरस्य अल्प-परिमाणवत्वात् तस्याणुभूते तस्मिन्

संभवात् नव्यापी परमेश्वरो दहर इति
प्राप्ते ब्रूमः - परमेश्वर एव दहराकाश
उच्यते कुतः उत्तरेभ्योऽपहतपाप्मत्वादिध
र्मेभ्यः एष आत्मा अपहतपाप्मा विज
रो विमृत्युर्वीत शोको विजिघत्सो विपि
पासः सत्यकामः सत्यसंकल्पः इति वाक्य
शेषप्रसिद्धेभ्यः एतेकश्च संसारिणि जीवे
संभवति तस्मादीश्वर एव दहराकाशोऽ
पहतपाप्मत्वादिगुणक इति॥

॥ गतिशब्दाभ्यां तथाहि दृष्टं
लिङ्गं च॥

तद्यथा पि. हिरण्यनिधिं (म्) निहितं क्षे
त्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमे
वेमाः सर्वाः प्रजा अहरह र्गच्छन्त्यः
एतं ब्रह्मलोकं (म्) न विन्दन्त्यनृतेहि प्र
त्यूढा इति वाक्यशेषे प्रजानामहरह

यस्मिन् दहराकाशे यागतिः श्रूयते । य
स्यान्त ब्रह्मलोकशब्दः ताभ्यामपि दहर
४६।३ आकाशः परमेश्वरः तथाहि श्रुत्यंतरे प
रमेश्वरस्यैव तावेरूप गमनं दृष्टं एवमे
व खलु सोम्येमाः सर्वाः प्रजा स्सति संप
द्य न विदुः सति संपत्स्यामह इति- ब्रह्म
लोकशब्दस्य तस्मि— एः स एष ब्रह्म
लोकः सम्राडिति होवाचेति ः तथाभूत
गति शब्दयोस्तद्दर्शनं । अस्मिन् प्रकर
णे सर्वासां अहरहः श्रूयमाणं गमनं ब्र
ह्मलोकस्य परमेश्वरस्य दहराकाशत्वे —
पर्याप्तं गमकं ॥

॥ धृतेश्च महिम्नोऽस्यास्मिन्नु
पपत्तेः ॥

अथ य आत्मा स सेतुर्विधृतिरेषां लोका
नां असंभेदायेति जगद्धृतिश्च परमेश्व

स्य महिमा अस्मिन् दहराकाशा उपलभ्य
ते, श्रुतिस्तु परमेश्वर महिमा एष सर्वेश्व
र एष भूताधिपति रेष भूतपाल एष से
तुर्विधरण येषां लोकानां संभेदायेति
श्रुतेरतोपि दहराकाशः परमेश्वरः -
॥ पासिद्धेस्च ॥
दहरं विपाप्मं परं वेश्म भूतं यत्पुंड
रीकं पुरमध्यसंस्थं। तत्रापि दहं गग
नं विशोक स्तस्मिन् यदंत स्तदुपासितव्यं
इति. महोपनिषदि हृत्पुंडरीकं विरजंवि
त्यारभ्य उमासहायं परमेश्वरं प्रभुंत्रि
46A लोचनं नीलकंठं प्रशांतं ध्यात्वामु
निर्गच्छति भूतयोनिं समस्तसाक्षिंत
मसः परस्तात् इत्यादि कैवल्योपनि
षदिच परमेश्वरस्योमासखस्य दहर
पुंडरीक मध्य वर्तित्वेनोपा स्य त्वं ./.ध

यो न्तर्हृदय आकाश स्तस्मिं छेते सर्वस्यव
शी सर्वस्येशानं इत्याद्युपनिषदन्तरे प्रसिद्धे
परमेश्वरस्य इह दहराकाशत्वेन विरोधइ
ति चेन्न - अत्रापि दहराकाशमध्यवर्ती
परमेश्वर उपास्यः किंतु दहराकाशं पर
मेश्वर धर्माणां म..पहत पाप्मत्वादीनां
संबन्ध प्रतीतेः दहराकाशत्वमप्यस्य
चिदम्बररूपतयेति नविरोधः -

॥ इतरपरामर्शात् स इति चे -
- न्नासंभवात् ॥

अथ यएष संप्रसादोस्माच्छरीरात्स
मुत्थाय परं ज्योतिरुपसंपद्य स्वेन
रूपेणाभिनिष्पद्यते एष आत्मेति होवा
चेति इतरो जीवः परामृश्यते अतः
प्रकृताकाशः स एव भवतीति चेन्न
उक्तानामपहतपाप्मत्वादीनां तस्मिन्नसं

भवात्॥ अनङ्गपरमेश्वर एव तच्छायरू
ति युक्तं॥

॥ उत्तराज्ञो क्तारि भूतिस्वरू
पस्तु॥

उत्तरत्र प्रजापतिवाक्ये यएष अपहतपा
४६/१३ प्मा विजरो विमृत्युर्विशोको विजिघ
त्सोऽपिपास स्सत्यसङ्कल्प सत्यका
म स्सोऽन्वेष्टव्य स्स विज्ञातव्य स्स सर्वां
श्च लोकान् आप्नोति सर्वांश्च कामा
न् यस्तमात्मान मनुच्य विजानाती
ति जीवस्यापहतपाप्मत्वादिकं श्रूयते
जीवल श्रवण ... वस्था त्रय वर्तित्वं च श्रू
यते यएषोऽक्षिणि पुरुषो दृश्यते एष आत्मे
ति होवाच यएष स्वप्ने महीयमानश्चर
ति एष आत्मेति होवाच तद्यत्रैतत्सुप्त
स्समस्त स्संप्रसन्न स्व ... नविजानाति

त्यैव आत्मेति होवाचेति तत्सत्यवाचं भवि तुमर्हतीति चेन्न सारमेतत्: निजानादिकर्मक ऊर्क संबन्धघटित कळेबर तिरोहितापहत पा प्मत्वादिको जीवः परंज्योतिरुप संपद्य स्वेन रूपेणाभि निष्पद्यत इति पद्मकापि ता.प हतपाप्मत्वादिको तत्प्रतिपाद्यते न संसारी दहराकाशस्तु स्वभाविकातिरोहित तत्तत्क लयाण गुणइति न बद्धो मुक्तो वात्त दहया का श४ ॥ - ॥

॥ - - - - - ॥

अस्माच्छरीरात्समुत्याय परंज्योति रुपसंपद्य स्वेनरूपेणाभि निष्पद्यतइ ति:परामर्शः अतोन विरोधः

॥ उपलप शुतेरिति चेन्नदु क्तम् ॥

उपलपस्पानाशयत्वात् स्वाल्पस्य रूपत्वपा

३८ A तीर्तेः नपरोयमिति शंकायाः पूर्वं १ मुक्तमेवो
त्तरं व्योमवन्नेति

॥ अनुकृतेस्तस्य च ॥

तस्य जीवस्य दहराकाशनिर्दिष्टपरंज्यो
तिरनुकृतिरवगम्यते । नैनं सेतुमहोरात्रे
तरतो न जरा न मृत्युर्न शोको न सुकृतं न
दुष्कृतं सर्वे पाप्मानो निवर्तन्ते । अपहतपा
प्मा ह्येष ब्रह्मलोकस्तस्माद्वा एतं सेतुं ती
र्त्वा अन्धस्सन्ननन्धो भवति विद्धस्सन्न
विद्धो भवति उपतापी सन्ननुपतापी भव
ति तस्माद्वा एतं सेतुं तीर्त्वा अपि नक्तमह
रेवाभिनिष्पद्यते सकृद्विभातो ह्येष ब्र
ह्मलोक इति वाक्यशेषे । अतो हि दहरा
काशं प्राप्तस्य पापकार्यत्वाद्यभावं सततोदि
तप्रकाशत्वंच प्राप्यस्य दहराकाशस्य अप
हतपाप्मत्वादिकं सततोदितप्रकाशत्वंच

हेतुत्वेनोच्यते । तस्य हेतुत्वं नि
रंजनः परमं साम्यमुपैति इति श्रुत्यंतरप्रसि
द्धं । मुक्तस्य परब्रह्मसादृश्यापत्तिनियम
मवलंब्य दहराकाशस्य परब्रह्मभूताङ्गी
कारेणैवोपपादनीयं । न तद्भावं न जीव इति
तात्पर्यं । पुनस्तस्मिन् प्रमाणांतरमाह-

॥ अपि च स्मर्यते ॥

दहरपुण्डरीकान्तर्वर्तित्वं उपास्यत्वं
च ब्रह्मणस्स्मर्यते । अणुवा परमात्मानं
४८ 13. परमानन्दविग्रहं । अङ्गुष्ठरूपं देशाद्विधेयं पु
रुषं कृष्णपिङ्गलं ॥ ब्रह्म ब्रह्मपुरे मार्गे
दहराब्ज रव मध्यमे । अध्यास्य सात्सं प्रप
श्यंति सन्तस्त्वं च तथा कुरु ॥ इत्यादि ।
ततः परं ज्योतिरूपं मुक्तप्राप्यं परश
कृत्य क्रमासनानं परब्रह्म दहरपुण्डरीक
काश मध्यवर्ती स्वाभाति की (का) पहतपा

प्रत्वादि गुणकमुपास्यजीवमिति-
सिद्धम्॥ अतः परमस्योपास्यं स्वीत
रमाह॥

॥ शब्दादेव प्रमितः॥

कठवल्ल्यां अस्य विषयः श्रूयते अंगु
ष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति
ईशानो भूतभव्यस्य न ततो विजुगुप्स
ते इत्यादि। इहांगुष्ठमात्रतया श्रूयमाणः
पुरुषः परमेश्वरो जीवो वेति संशयः-
जीव इति वक्तुम (म) युक्तं। अंगुष्ठमात्र
इत्यल्पत्व व्यपदेशात् च मध्य आत्म
नि तिष्ठन् देहान्तर्वर्तित्वावगमाच्च न
तु परमेश्वर, व्यापक इति प्राप्ते वदामः
परमेश्वर एवांगुष्ठमात्र इति युक्तं ईशानो
भूतभव्यस्य इत्यादि परमेश्वर लिङ्ग श
ब्दात् सर्वैश्वर्य संपन्न स्सर्वेश्वर

भूमिरुत्काशमध्यगइति तस्यैव सर्वेश्वरत्वश्रवणात् - कथं परमेश्वरे परिच्छिन्नत्वमुपास्यमानं (मा) नमुपपद्यत इत्यमानमुपत आह-

।। हृद्यपेक्षया तु मनु......
.... ।।

४९ A ... शास्त्र विधौः मनुष्याणां १ हृदयम (म) यावत्प्रमाणं —— छिन्नं रूपं परिगृह्णाति परमेश्वरः परमकारुणिकः परिगृह्णाति तदुपासनासिद्ध्यै सतः परमेश्वरो ज्योतिर्मयो लिङ्गरूप उपासक हृदयमध्ये तिष्ठतीति । निर्णयः - मनुष्याधिकारत्वादित्यस्मिन्नधिकरणे - मनुष्याणामेव परमेश्वरोपासनेऽधिकारः स्युचितः । कथं देवानामपि परमेश्वरविषयमुपासनं (ं) श्रूयते अन्य... शिरसि-त

तो देवा रुद्रेनापश्यन् ते देवा रुद्रे ध्याय
न्तीत्याशङ्काया माह—

॥ तदुपर्यपि बादरायणः स-
-म्भवात् ॥

इह परमेश्वरोपासने देवानामधिका
रः संभवति नवेति संशयः नसंभवती
ति पूर्वःपक्षः अर्थी समर्थो ..... विद्वान्
शास्त्रेणापर्युदस्तो हि वैदिक कर्मण्यधि
कारी नच तेषां सामर्थ्यमस्ति विग्रहाभाव
त् विग्रहवतो हि स्तुति ध्यानादिषुक
र्तृत्वं सम्भवति इन्द्रो वज्रमुद्यच्छत् इत्यादीनां प्रामाण्यात्ते
षां विग्रहवत्त्वं इति चेन्न विध्यैकवा
क्यतापन्नानां अन्यत्र तात्पर्याभावात्
तत्सद्भावेपि तेषामर्थित्वं नास्ति परमेश्व
र प्राप्तेः तेषां परमेश्वरस्यच पदस्यैकत्वात्

१९ 13. देवाह्वै स्वर्गं लोकमग्निं गामं न्तेदेवाः (?)
देवै पृच्छन् इति श्रुत्या स्वर्गपुव लोकेः
देहस्य परब्रह्मणः पदमेव गम्यते. सएव
देवानां मुक्तस्यापि स्वाराज्यमेव प्राप्यत
यावगम्यते आप्नोति स्वाराज्यमित्यादि
श्रुत्या (श्या) वैदुष्यमपि तेषां नास्ति.
उपनयन संस्कार पूर्वकस्य वेदाध्ययन
स्याभावेन तेषां वेदांतविचारसंभव.
ब्रह्मबोधानुपपत्तेः. अतएव तेषां शास्त्र
पर्युदासश्च. तस्माद्देवानां नास्ति ब्रह्म
बोधने धिकार इति. सिद्धांतस्तु ब्रह्मो
पासने देवानामप्यधिकारोस्ति. कुतः
तेषामर्थ (र्थि) त्वसंभवात्. नचपर
मेश्वरस्य देवानां च पदं समानं यतस्सा
मान्येन सुखवाचकोपि स्वर्गशब्दः प्र
करणादिना विशेषमभिधत्ते यन्नेश्वर

शब्दः स्वामित्वमात्रवाचकः प्रकरणवशात्
उपेयादीश्वरस्यैव योगक्षेमार्थसिद्ध्ये स्या
दिषु जनपदाधिपत्यमात्रं शब्दः शरीरि
राजविषयः शब्दः. प्रकरणे पुनरयं नि
रतिशयैश्वर्यवाची तद्विषयो भवति -
तथा सुखमात्रवाची स्वर्गशब्दः प्रक
रणेन प्रमाणान्तरोपपत्त्या च देवानां पदं
क्षयिष्णुत्व सातिशयत्वादि कलुषितं ~~स्वल्पं~~
स्वल्पसुखरूपमभिधत्ते. परं तु ब्रह्मणः
१०A ब्रह्मणः शिवस्य पदं तु निरतिशयरूप
मनावृत्तिलक्षणमेव ब्रूते अतस्सातिश
यत्वादि दुष्ट सुखपदवर्तिनां निरतिश
यसुखं ब्रह्मपदं प्राप्य क्षत्रं संभवत्येव
~~निरतिशय स्वर्ग~~ शक्यतिशय स्वर्ग
भा.......................... पूर्वाधीतवेदार्थ
विस्मरणाभावाद् तेषां वेदपर्यन्तसे

संभवति शास्त्रस्य साधारण्येन उपासना विधायकत्वात् अधिकारस्य दुर्निवारत्वेन दूरतस्तत्पर्युदासः तेषां अर्थ .... शाब्दत्वेन सामर्थ्यं तु चास्ति - आदित्यो यूपः अग्निर्हिमस्य भेषजं इत्यादीनां गुणवादानुवादानां स्वार्थे तात्पर्याभावेपि इन्द्रो वृत्राय वज्रमुद्यच्छ दित्यादीनां विरोध .... प्राप्त्य भावेन स्वार्थे तात्पर्य संभवात् ब्रह्म विद्यायामधिकरणो देवाः - देवानां विग्रहादिमत्वे विरोधमाश ङ्क्य परिहरति

॥ विरोधः कर्मणीतिचेन्नानेकप्र .... ॥

नानादेशेषु प्रवृत्तेषु यज्ञेषु तत्तत् तादृतानां देवानां विग्रहादिमत्वे सर्वत्र युग

पत्सान्निध्यं वाच्यं तन्न युज्यते ततः कर्मणि विरोध इति चेन्न- शक्यमेतत्तथापि
१।३।२७ शाहवत्वेऽपि सौभरि ..... अ गपद्दनेक देह प्रपत्ति र्दृष्टा- ततो न कश्चिद्विरोधः मा भूत्कर्मणि विरोधः वैदिके शब्दे भवती ~~त्यत~~ - त्यत आह-

॥ शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥

कर्मविरोधाभावेऽपि वैदिके शब्दे वि ... ... ते- कथं देहानाम् सावयवत्वात् अनित्यत्वं सहजमेव तत इन्द्रादि देहानामप्युत्पत्ति रानेर्यं(?)- तस्मात्तदुत्पत्तेः प्राक् तद्विनाशात् परत्र्च वैदिकेन्द्रादि शब्दानां अर्थशून्यत्वं अनित्यत्वं ..... नित्यत्वेऽपि पौरुषेयत्वेन विधिनिषेधवाक्यानां प्रा

मण्यं तत्तत्प्रयुक्तकर्मणा ऽ[स्या]सिद्धिरिति
रुपनैकान्यर्थापत्तिः। अतो वैदिकशब्दवि
रोधपरिहाराय विग्रहवत्त्वं देवाना मन
ङ्गी· · · · · ·चेन्न अतो वैदिकादेव इ
न्द्रादिशब्दात् इन्द्राद्यर्थसृष्टेः- यदी
न्द्रादिशब्दाः व्यक्तिवाचकाः स्युः तदा
खल्विन्द्रादिनाशे तेषामर्थशून्यत्वं -
ऽनित्यत्वं वा स्यात् - गवादिशब्दवदाकृ
तिवा· · · · · · · · · ·न्द्रादिशब्दानामुच्य
ते तथाच यथा कुलालो घटादिशब्दा
त् मनसि विद्याकृतिविषय(दो)पस्मृ
त्वा तदाकारं परमिन्द्रादिकं सृजति।
तत इन्द्रादिव्यक्तिविनाशे (पि) तत्तदा
61·A कृतेरपि नाशो न। · · · · · · · · · · · · ·
। (श्य) नित्यत्वाद विरोधः- किं प्रमाणमिति
चेत् न. श्रुतिस्मृ· · · · · · · · · · ·पेक्ष्य-

करोत् सत्तासती प्रजापतिः समुरिति व्याहरत् स भूमिं सृ तेत्यादि श्रुतिः स र्वेषां च स नामानि कर्माणि च पृथक् ...... वेद शब्देभ्य एवादौ पृथक् संस्थाश्च सानिर्ममे ।। इत्यादि स्मृते ...... तेः ...... (अत एव च नित्यत्वं)

{।। अतएव च नित्यत्वम् ।। }

अतएव मन्त्रकर्ता वृणीते विश्वामित्रस्य सूक्तं भवतीति विश्वामित्रादीनाम् मन्त्रकृत्वेपि विश्वामित्रादि शब्दानामा कृति निमित्तत्वेन मन्त्राब्राह्मण्यस्य वेदस्य नित्यत्वमुपपद्यते, यतो ब्रह्मा वैदिकाच्छब्दात् कल्पान् स्मृत्वा सृजति अ नधीत मन्त्रादि दर्शन शक्तत्वात् - तथास्य पूर्व विश्वामित्रादीनां आकृति ... श्रा ता न तत्तद्वैदिक शब्दैः स्मृत्वा तदाका

शनैर्वा परान् तत्तच्छक्तिविशिष्टान् ए
ष्टान् ब्रह्मा नैमित्तिकप्रलये प्राकृतप्रलये
ब्रह्मादौ वेदाख्यशब्देन विनष्टे कल्पे
ह्यनित्यत्वमित्यत आह-

।। समा........ .... रूपत्वाच्च...वृत्तौ-
— अविरोधो दर्शनात्स्मृतेश्च।।

सृज्यानां समाननामरूपत्वादेव प्राकृत
प्रलयावृत्तावपि अविरोधः- तथा हि·
सर्वज्ञः सर्वशक्तिः विश्वाध्येकः परमे
श्वरः आदिकर्ता पूर्वप्रपंचरूपान्
९१ 13 स्मृत्वा तदाकारमेव पुनः प्रपंचं सृजति·
देवानपि पूर्वानुपूर्वविशिष्टान् सं
स्मृत्य पुत्रभूताय ब्रह्मणे प्रयच्छति-क
त्वो गम्यते श्रुत्या स्मृत्या च सूर्याचन्द्र
मसौ धाता यथापूर्वमकल्पयत् दिवञ्च पृ
थिवीञ्चान्तरिक्षमथो सुवः यो ब्रह्माणम्

बिदध्यातिपूर्वं योवेदांश्च प्रहिणोतितस्मा इ
त्यादिश्रुतिः स्मृतिरपिं उपप्लवसर्गादौ
नाखुवीर्यमपाःसृजत् । ब्रह्माणं विदध्ये पूर्वं
वेदान् मे प्रयच्छतीत्यादिं ततः प्राकृत
प्रलयावृत्तावपि वेदानां नित्यत्वमेव
मतांतरमाह

।।मध्वादिष्वसंभवादनधिकारं
-जैमिनिः।।

मधुविद्यादिषु वस्वादिदेवानामेवो
पास्यत्वात् युःसुत्वादीनामुपव प्राप्यत्व
च्च वस्वादीनां कर्तृकर्मभावविरोधा
नोपास्यत्वासंभवात् वस्वादीनां सता
मुवस्त्वादेत्वं प्राप्तमिति प्राप्यत्वासंभवा
च्च तत्र वस्वादीनामनधिकारं जैमिने
र्मन्यते

।।ज्योतिषि भावाच्च।।

तं देवा ज्योतिषां ज्योतिरायुर्होपासते
. . . . ब्रह्मणि देवानां सा
धारण्येन प्राप्तत्वाद्विकारभाववचनाद्न्य
त्र मध्वाद्युपासनैर्नन्वधिकारो न्यायसिद्धं
१२A द्धोबगम्यते

॥ भावंतु बादरायणोस्तिहि ॥

मध्वादिष्वपि वस्वादीनां अधिकाराभा
वं बादरायणो मन्यते अस्ति वस्वादी
नां सत्ता स्वावस्था ब्राह्मण उपास्यत्व
संभवः कल्पान्तरेव सुतादेः ... प्यत्व
संभवश्च कार्यकारणोभयावस्थं ब्रह्मतः
समुपास्यं तत्रा(ता) सूचा (वा) दित्यो
देव मधु इत्यारभ्यादित्यवस्वादीनां
रूपम् युक्तकार्य विशेषावस्थं ब्रह्म उपा
स्यमुपदिश्यते अणत त ऋ देतिनौ वो
देता नास्तमेता इत्यादिना नामरूपरहित

सूक्ष्मादित्यान्ततारतम्यतयावस्थितं कारणः
वस्तुं ब्रह्म उपास्यमुपदिश्यते उभयाव
स्थापि ब्रह्मोपासनाफलं कुलपीतरं वस्वा
दित्व मुभयाधिकारावसाने ब्रह्मप्राप्ति
श्च तत्र सत्य एतदेवमृतं वेद वसूना
म् एवैकोभूत्वाग्निनैव मुखेन एतदेवामृ
तं दृष्ट्वा तृप्यतीत्यादिना वस्वादित्वरू
पं फलमुपदिश्यते नह वा अस्मा उदेति
न निम्लोचति सकृद्दिवा हैवास्मै भवति
य एतामेवं ब्रह्मोपनिषदं वेदेति ब्र
ह्म प्राप्तिरूपं फलमुपदिश्यते ततो मध्वादि
ष्वपि देवानामधिकारोस्ति सर्वत्रादे
वा ब्रह्मविद्यायां अधिकारिणः अन्यथा
१२ B मनुष्याधिकारत्वादिति सामान्येन
मनुष्याणामधिकारे प्राप्ते विशेषमाह-
॥ शुगस्य तदनादरश्रवणात्तः-

– शाद्व प.णा.त्स. सूच्यते ।९॥

छान्दोग्ये श्रूयते स्य विषयः आजहा
रेमा शू. (ः) शूद्र अनेनैव मुखेना (ना)ला
पयिष्यथा. इति. अत्र शू(त्रा) र्थश्च
ब्दं शूद्रत्वामन्त्रयते अतश्शूद्राणामपि ब्र
ह्मविद्यायामधिकारोऽस्ति. न वेति संशयः –
तेषामधिकारोऽस्ति अर्थित्वादि संभवात् न
च त्रैवर्णिकानामेवेति नियमः अत्र त्रैवर्णिका
नामपि देवानामपि तद्दर्शनात् देवानामु
पनयनाध्ययनाभावेऽपि स्वयं भातवेदार्थ
तया युज्यते विदुत्तादिव्यमभीषामिति न
शङ्क्यं तेषामपि पुराणश्रवणादिना सौ
क्षोपपत्तेः । निषादस्थपति न्याये मा.हा
नाक्य श्रवणे अधिकारसंभवाच्च तस्माद
मीषामधिकारो ब्रह्मविद्यायामुच्यतं इति
प्राप्ते ब्रूमः – नास्ति शूद्राणां ब्रह्मविद्याया

मधिकारः तेषामध्ययनाभावेन तदुपायभू
तोपास्यत्वादिगुणादिज्ञानासंभवात् इति
हासपुराणानि वेदोपबृंहणं कुर्वन्त्येव उपा
यभावमनुभवन्ति न स्वातन्त्र्येण शू
द्राणां इतिहास पुराण श्रवणानुष्ठानं
93:A ... पापक्षयफलं विदुरस्य धर्मव्याधा
दीनां जन्मान्तर सिद्ध ज्ञानाप्रमोषात् ब्र
ह्मनिष्ठता - कथं ब्रह्मविद्योपदेशो शूद्रेत्या
मन्त्रणमिति चेत् नात्र जातियोगेन शू
द्रेत्यामन्त्रणं किंतु ब्रह्मज्ञानाप्राप्त्या शु
गस्य संजातेति दर्शनात् शुगस्य संजाते
ति तदनादरश्रवणात् ब्रह्मविद्यावैक
ल्येन स्वात्मानं प्रति हंसोक्तानादरवा
क्य श्रावणात् तदैवाचार्यं प्रत्याद्रवणा
च्च सूच्यते हि शब्दो हेतौ यतश्शूद्रेत्या
मंत्रणं [1] न शूद्रेत्यामन्त्रणं उपाख्या

1. न... त ज्ञा (जा) ताति (भे) योगेन ततश्शूद्रस्य ब्रह्मो
पासने नास्ति इति । इतश्च शूद्रेत्यामंत्रणं न जात्यातियोगेनेत्यत आह
॥ क्षत्तियत्वगतेश्च ॥ - शुगप्येः ज्ञान शूद्रेः क्षत्तियत्वावगतेश्च न
जाति योगे ।

नोपक्रमे हि श्वा नश्रुति र्हि पौत्रायण. श्वा
श्वादृयो बहुदायि बहुपाक्य आस ससर्वत
अवस्था न्नान् मापयानि पन्न मापयान्यके स
र्वत एवमेतृत्तत् स्यंतीति श्वानश्रुते ४ श्रद्धा
नुत्सृ पतित्वं बहुतर पक्कान्न प्रदायित्वं चो
क्तं भक्ष्येच स्वहे संजिहान एव क्षत्ता
र मुवाचेति क्षत्तृ प्रेषणमुक्तं अन्तेच ह
यं जाया अयं ग्रामो यस्मिन्नास्स इति ते
हैते रैक्व पर्णानां महावृषेषु यत्रास्मा
९२: उपास्मेति बहुग्राम प्रदायित्वमुक्तं एतैर्लि
१३: ङ्गैः ... क्षत्रिय ... त्वमवगम्यते।।
।। उत्तरत्र चैत्ररथेन लिङ्गात् ।।
उपरि व्याख्यास्यां संवर्गविद्यायां ब्राह्मण क्षत्रि
ययोरेवा ... थो दृश्यते अथ ह शौनकं
च कापेय मभि प्रतारिणंच काक्षसेनिं परि
विष्यमाणौ ब्रह्मचारी बिभिक्षे इत्यादौ अत्रा

भि
ति प्रतारी चैत्ररथ: क्षत्रिय इत्यवगम्यते। का
पेयारण्य याजक योगात् कापेय याजक
योगोहि चित्ररथस्य कुलत: एतेन (न)
चित्ररथं कापेया अयाजयान् तमेका
किन मन्नाद्य स्याद्यथ कुर्वन् इति तेना
भि प्रतारिण: स ज्ञाभेदात् चित्ररथत्वा
सिद्धावपि तद्वंश्यत्वं सिध्यति समानान्व
या नाम. हि समानान्वयात् प्रायेण
याजका भवन्ति चित्ररथवंश्यत्वे सति
क्षत्रियत्वं तस्माच्चैत्ररथीनाम एक: क्षत्र
त्रियपति: जायते इति तद्भूयशेषेण सि
ध्यति एवं चोत्तरत्र ब्राह्मणेन कापेयेन
भि
युक्तोऽभिप्रतारी क्षत्रिय इति निश्चीय
ते. तद्ब्राह्मणेन शैक्षेन युक्तो जानश्रु
तिरपि क्षत्रिय इति गम्यते अत: क्षत्रि
यत्व शूद्रस्याभीतित: यद्युक्तं निषाद

स्थपति न्यायेन शूद्रस्य महावाक्य श्रावणे-
ऽधिकार इति तत्राह ६४४.

१। संस्कार परामर्शात् तदभावाभिलापाच्च ॥

ब्रह्म विद्योपक्रमे उपत्वा नेष्ये तं होपनिन्य इत्यादि प्रदेशेषु उपनयन संस्कार परामर्शात् शूद्रस्य च न शूद्रे पातकं किंचित् न च संस्कारमर्हति । शूद्रस्तु वर्णश्चतुर्थ एकजातिः इत्यादि स्मृतिषु तदभाव श्रावणात् तस्य ब्रह्म विद्यायामनधिकारः । निषादस्थपतिं याजयेदिति विधिरस्तीति तत्तन्निबोधः । उपासनाभावेऽपि शूद्रस्य महावाक्य श्रावणं कुत्रापि (तदभाव निर्धारणे च प्रवृत्तेः).

२। तदभाव निर्धारणे च प्रवृत्तेः ॥

नैतदब्राह्मणोऽपि वक्तुमर्हति समिधं सोम्या

हरोप त्वा नेष्ये न सत्यादगा... इति सत्य
वचने :: जाबालस्य शूद्रत्वाभाव निर्धारणे
सत्येवं: मुपनयनाभावेपि नब्राह्मा मिप्याह्
राय: द न्यह स्वध्यानिनयनात् इति स्व
ध्याने नयनं ब्रह्मोच्चारणे निषेधो न ब्रह्म
विद्याया मित्याशङ्कायामाह-

।। श्रवणाध्ययनार्थप्रति
षेधात् ।।

शूद्रस्य वेदवाक्य श्रवणादिनि
षिध्यते तस्माच्छूद्रसमीपे नाध्ये-
तव्यमिति अनुपशृण्वतः कुतोध्य
यनादि प्रसक्तिः ।।

।। स्मृतेश्च ।।

स्मर्यते च शूद्रस्य वेदाध्ययनादौ
दण्डः ...... हास्य वेदमुपशृण्वतः
६४७ ना त्रपुजतुभ्यां श्रोत्रप्रपूरणं उदाहरणे

च्चि .... इति एवं श्रुतिस्मृति
भ्यां भ्रुत्या शूद्रस्य समीप समीपाद्ध्ययनादिनि
षेधात् कुतस्तेषां वेदार्थविचारसिद्धिः अतः
स्सर्वथा अतु (भू) वर्ण ब्राह्मणाद्युपयुक्तोप
नयनसंस्कारमंतरेण वेदाध्ययन प्राप्तिः न
कुत्रापि कस्यचिदिति शूद्रः ब्रह्मवियायाम
नधिकारिण एव। एवं प्रासङ्गिकमधिकारनि
रूपणं कृत्वा प्रकृतमनुसरति -

॥ कम्पनात् ॥

कठवल्ली श्रु(सु) श्रूयते यदिदं किं
स्वच्ये जगत्सर्वं प्राण एजति निस्सृतं
महद्भयं वज्रमुद्यतं मयि. एतद्विदुरमृता
स्ते भवन्तीति : अत प्राणशब्द निर्दि
ष्टजनितभयेन सकलजगत्कंपनमुच्यते
अतः कंपनहेतुः परमेश्वरोन्योवेति संशये
परमेश्वरस्य सकलं जगद्भयप्रदानम

धुरस्वभावस्य परमकारुणिकस्य जगत्कं
पनहेतुत्वमयुक्तं एतस्माद्वज्रश्रुतेरशनेः
कंपनहेतुः यद्वा प्राणवायुः कंपनहेतुः प्राण
श्रुतेः प्राणवायो र्देहे चलनहेतुत्वेन प्राणे
निमित्ते त्सर्वमिदं जगच्छरीररूपं चल
तीति य. (: किंच जगत्सर्वं प्राणएज
99. ति निस्सृतमिति अस्य ततो ? पपत्तेः
वायुनिमित्तत्वे.. विद्युः स्तनयित्नु वृ
ष्टिवत् महाभयहेतुरशनिरपि विव
र्तत इति महद्भयं वज्रमुद्यतमित्या
स्यापि ततोपपत्तेः वायुरेव व्यष्टि(व्य)
ष्टिर्वायुरेव समष्टिरूपकुनर्मृत्युंजय
ति य एवं वेदेति श्रुतेः वायुविज्ञाना
देमृतत्वोपपत्तेश्चेति प्राप्ते परमेश्वर
एव कंपनहेतुरिति ब्रूमः परमेश्वरस्य
सकलजगत्कंपनहेतुत्वं शास्त्रकारो कृ

भवति यस्य शासनभयेन सर्वे वयं
निषिद्धेभ्यो विमुखाः विहितेषु प्रवर्तामहे त
च्छासन भयादेव वाय्वादीनां स्वास्वाधि
कार प्रवृत्तिः भीषास्माद्वातः पवते इत्या
दिष्ववगम्यते कल्याणमूर्तिरपि पर
मेश्वरः शासकतया भयङ्करो भवति
तच्छ्रूयते तस्माद्राजमुखं भीष्मं भयान
कं इति तस्मात् स्वामित.. सकलजग
द्भय हेतुभूत ईश्वर एव; दहरादिषूपास्यत
या निर्दिष्टस्य परमेश्वरस्य प्राप्यत्वमुप
पादयितुमधिकरणान्तरमारभ्यते।।

।। ज्योतिर्दर्शनात् ।।

छान्दोग्यस्य प्रजापतिविद्यायामाम्ना
यते विषयः एष संप्रसादोऽस्माच्छरीरात्
समुत्थाय परं ज्योतिरुपसंपद्य स्वे......
९९ 13 .... न स उत्तमः पुरुष इति मुक्त

प्राप्यतया श्रूयमाणः परं ज्योतिः परमेश्वरः किं वा नारायणो मूर्त्यात्मेति संशयः - उत्तमः पुरुष इति मुक्तप्राप्यस्य परंज्योतिषः पुरुषोत्तमशब्दवाच्यतया - - . . . . शब्दस्य नारायणे रूढतया सवत्र उत्तमपुरुष शब्द समानाधिकरण परंज्योतिरिति प्राप्ते ब्रूमः - मुक्तप्राप्यं परंज्योतिरिह परमशिवाभिधानं परं ब्रह्म, तत्प्राप्तानां पुनरावृत्ति श्रवणात् परब्रह्मणोन्यत्र प्राप्तानां कर्मफलानावृत्तिः समुचितः. पुरुषोत्तमशब्दो नारायणे रूढोपि ब्रह्मण्यपि वर्तते पुरुषेभ्यो जीवेभ्यो भिन्नत्वात् · ब्रह्मेयं कल्पेपि वेष्टितुं पुरुषोत्तममिति · प्राप्यस्य परब्रह्मणः पर्यायत्वेन पुरुषोत्तमशब्दस्य प्रयोगात्, अतः परब्रह्मैव परंज्योतिः ॥

॥ आकाशोऽर्थान्तरत्वादि व्यपदेशात् ॥

छान्दोग्ये श्रूयते स्य विषयः . आकाशो
ह वै नाम नाम. नामरूपयोर्निर्वहिता.
ते यदन्तरा तद्ब्रह्म तदमृतं ...... इति-
अत्राकाशः परमेश्वरोऽपि (वि) यद्वा जी
वो वेति संशयः - सर्वभूतावकाशप्रदाने
न नामरूपयो. निर्वोढृत्वस्य वियति
संभवात् वियदिहाकाशः - अथवा जी
वः अनेन जीवेनात्मनानुप्रविश्य नाम
५६ रूपे व्याकरवाणी इति तस्य नामरूपव्या
४ करण संबन्ध दर्शनात्: इत्येवं प्राप्ते ब्रूमः
परमेश्वर एवाकाशशब्देन नामरूप नि
र्वोढा श्रूयते अमृतत्वादि तद्धर्माणां व्यपदे
शात् नह्याकाशेऽमृतत्वादिकं संभवति
जीवे वा अतः परमेश्वर एवाकाशः ननु

तत्त्वमसीत्यादिना ऐक्यव्यपदेशात् न प्रा
त्यगात्मनो ऽन्तरभूतः परमेश्वरो ऽस्तीत्या
शङ्क्याह

॥ सुषुप्त्युत्क्रान्त्योर्भेदेन ॥

प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंच-
न वेद नान्तरं प्राज्ञेनात्मनान्वारूढ
उत्सर्जन् यातीति सुषुप्त्युत्क्रान्त्योर्बा
ह्यान्तर विषयज्ञान शून्यात् जीवात्तदानी
मेव प्राज्ञतया भेदेन व्यपदेशात् जी
वादन्यान्तर भूतः परमेश्वरोस्ति स
एवाकाशः ॥ (जगत्)

॥ पत्यादिशब्देभ्यः ॥

परिष्वंजके प्राज्ञे श्रूयमाणेभ्यः प
त्यादिशब्देभ्यः ~~शब्देभ्य~~ श्चायमर्थ
न्य: जीवादित्यवगम्यते सर्ववशी स
र्वस्येशानः सर्वस्याधिपतिः स न सा

धुनाकर्मणा भूयान् नो एव साधुनाकर्मणा कनीयान् । एषसर्वेश्वर एषभूताधिपतिः एष भूतपाल इत्यादिकमुत्तरत्र हि दृश्यते । पशूनां पतये वृक्षाणां पतये इत्या
९६।१३ दिभिश्च परमेश्वरस्य जगदाधिपत्यं प्रसिद्धं नकुत्रापि जीवस्य तस्माद्दयं जीवादन्यः परमेश्वरएवाकाशः ॥

इति

श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः ॥

॥ हरिः ॐ ॥

पूर्वपादे स्पष्टास्पष्ट ब्रह्मलिङ्गानि वाक्यानि विचारितानि । इहास्पष्टलिङ्गानि कतिचन वेदान्त वाक्यानि विचार्यन्ते ॥ आनुमानिकमप्येकेषामिति—

- चेन्न शरीररूपक विन्यस्तगृ -
- हीतेर्दर्शयति च॥
एकेषां कठानां शाखाया माम्नायतेऽस्य
विषयः इन्द्रियेभ्यः परा ह्यर्थाः अर्थे-
भ्यश्च परं मनः मनसस्तु परा बुद्धिः
बुद्धेरात्मा महान् परः महतः परम
व्यक्तं मव्यक्तात् पुरुषः परः पुरु
षान्न परं किंचित् सा काष्ठा सा परा
गतिरिति - अत्र महत्परत्वेनोच्यमानम
व्यक्तं कापि लं प्रधानं उत शरीरं
वेति संशयः प्रधानमिति पूर्वपक्षः
कणं महदव्यक्तपुरुषाणां सांख्यतन्त्र
एव प्रसिद्धेः तेषामिह श्रुतौ प्रत्यभि
ज्ञानात् वपुषो न कस्यचिदिह प्रसंगः
तस्मात् सांख्य प्रधानमिति - वपुरि
९6A ति सिद्धान्तः पूर्वत्रात्मा १ - रथिनेति

द्धि शरीरं रथमेव तु बुद्धिं तु सारथिं वि
द्धि मनः प्रग्रहमेव च इन्द्रियाणि हयान्या
हु विषयांस्तेषु गोचरान् ॥ इत्याध्यात्मश
रीरादिषु उपासनोपायेषु वशीकारत्वा
त् रथरथ्यादि रूपक विन्यस्तेषु प
रिशिष्टस्य शरीराख्य रूपक विन्यस्त
स्याव्यक्त शब्देन गृह्यते.. इन्द्रियेभ्यः
परा ह्यर्था इत्यारभ्य साकाष्ठा सा परा ग
तिरित्येतेन वशीकार्यत्वाय हि उत्तरो
त्तरं प्र. परा उच्यते तदेत यच्छेद्वा
ङ्मनसी प्राज्ञः यच्छेत् ज्ञानमात्मनि म
हति नियच्छेत् तद्यच्छेत् शान्त आत्मनी
ति श्रुतिरेवार्थं दर्शयति. तस्मादव्यक्त
शब्देन वपुरत्र प्रतिपाद्यम् (म) ननु
प्रधानमव्यक्तमिति प्रसिद्धं कथमिह श
रीरत्वमुच्यत इत्याशङ्कायामाह-

॥ सूक्ष्मं तु तदर्हत्वात् ॥

~~सूक्ष्ममिह व्यक्त~~ सूक्ष्ममित्यव्य
क्तमुच्यते अव्यक्तमेव शरीरावस्थं का
र्यार्हत्वात् अव्यक्तशब्देनोच्यत इति
युक्तं ॥ युक्त्यन्तरमुच्यते ।

॥ तदधीनत्वादर्थवत् ॥

आत्मशरीरादिकं परमेश्वराधीनतया
अर्थवत् उपासना निवृत्तये भवति ।
९६ परमेश्वरोन्तर्यामी । सर्वात्मादिकं प्रे
रयन्नेव उपासनोपायत्वेन वशीकार्य
कार्येति प्राप्यत्वेन सापरागतिरिति चोच्य
ते । ततोव्यक्तमिह शरीरमेव ॥

॥ ज्ञेयत्वावचनाच्च ॥

यदि सांख्यं प्रधानं अत्राव्यक्तं तदा
स्य ज्ञेयत्वमुच्येत नच तदस्ति । अतोन
कापिलमव्यक्तं - ज्ञेयत्वमस्योक्तमसी

त्याशङ्क्याह परिहरति —

॥ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्। अनाद्यनंतं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते। इत्यणेतन्मेतस्यापि ज्ञेयतां वदतीति चेन्न - यच्छेद्वाङ्मनसी प्राज्ञ इति प्राज्ञस्यैव पूर्वं प्रकृतत्वात् अतोऽव्यक्तं शरीरमेव. प्रधानस्य प्रसंगा एव नास्तीत्याह.

॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥

त्रयाणां मुपास्योपासनोपासकानां एवात्र प्रकरणे ज्ञेयतया प्रश्न उपन्यासः क्रियते. न प्रधानादेः यथा तं दुर्द

श्री मनुगुरु द मनु प्रावित गृहीत्वा
शहैर्ये पुराणं अध्यात्म योगाधिगमेन
देवं मत्वाधीरो हर्षशोकौ जहाति ॥
९८ A त्यां दिभिरुपन्यास योऽमृ पीते स्विविचिकित्सा मनुष्ये अस्तीत्येके नाय
मस्तीति चैके । एतद्विद्यामनुशिष्ट स्त्वया
हं प्रबराणामेष वरः स्मृतीय इति ।
अन्यत्र धर्मादन्यत्राधर्मात् अन्यत्रा
स्मात् कृताकृतात् अन्यत्र भूताच्च
भव्याच्च यत्तत्पश्यति तद्वदेति च पृ
ष्टः ॥ तस्मा द प्रकृतत्वादपि शरीरमे
वाव्यक्तम् न प्रधानं - किं च लिङ्गा
न्तर मपि स्ती त्याह ॥

॥ महद्वच्च ॥

य णेह बुद्धेरात्मा महान् पर इत्युक्त...
तीति को महान् भवति । महद्वदात्

तथाव्यक्तशब्दादपि न प्रधानमिति नि
र्णयः. अप्रकृतत्वादिह न प्रधानप्र
स्ताव इति भवतु अन्यत्र प्रधानमेव श्रू
यते कारणत्वेनेत्याशङ्क्या.....करण
मिदमारभ्यते —

॥ चमसवदविशेषात् ॥

श्वेताश्वतरोपनिषदि श्रूयते ह्यविष
यः अजामेकां लोहितशुक्लकृष्णां..
बह्वीः प्रजाः सृजमानां सरूपाः - अज
ो ह्येको जुषमाणोनुशेते जहात्येनां -
भुक्तभोगामजोऽन्यः इति. इह सर्वप्र
पंचकारणत्वेन जन्मरहितत्वादजेति
श्रूयमाणा प्रकृतिस्सांख्याभिह्रापरा वे
ति संशये सांख्यसिद्धेति वक्तुं युक्तं. अ
९५ 13 जामिमां इति जन्म. भाव [illegible] . नात्
सर्वप्रजाकारणत्वाच्च लोहितशुक्लकृष्णा

मिति- वर्णोपलक्षित गुणतायावगमात्त्व तदन्यस्याः कस्याश्चिदेवं विधायकत्वं न्युक्तमिति प्राप्ते ।सिद्धान्तः न तु तत् सिद्धा प्रकृतिरिह कारणत्वेनोच्यते नहि- जन्माभावमात्रेण तस्या एव प्रतीतिः - अर्वाक्त्य बिला स्वमस इति वत् प्रकरणे विशेषाभावात् यथा उर्ध्व तच्छिर इति चमसो विशेष्यते- यौगिक शब्दवृद्धिशेष प्रतीति हि विशेषका.... त ततोन....तिकौ प्रकृतिरिति - तत्त सिद्धायाः प्रकृतेरन्या कोट्रशीत्यत आह:-

॥ ज्योतिरुपक्रमा तु तथाह्यधी-
- यत एके॥

अत्र ज्योतिरिति परमेश्वर उच्यते परमेश्वरकारणिकेयमजा प्रकृतिरिति उच्यते तथा हि परमेश्वरकारणिकाया एव प्रति

पादकं एकं तैत्तिरीया पृ.त्सरूपं मन्त्र
मधीयते अणोरणीयान् महतो महीयानिति
परमेश्वरमुपक्रम्य सप्त प्राणाः प्रभवन्ति
तस्मादित्यादिना प्रपञ्चस्य परमेश्वराद्
उत्पत्त्या तदात्मत्व प्रतिपादन समयं ह्युदाम्ने
ति पठ..ति अतस्तत्प्रत्यभिज्ञानात् इयमपि
परमेश्वरकारणिकेति निश्चीयते अतो न
६९ A. तत्त्वसिद्धेति वादो १. का.. ८. ननु परमेश्व
रकारणिकेत्यस्याः परमेश्वर कार्यत्वमुच्य
ते कथमस्यास्तादृश्या अजामिति वादद
त्याशङ्क्याह-

।। कल्पनोपदेशाच्च मध्वादिप..
त् विरोधः।।

कल्पनेति सृष्टिरुच्यते .... पञ्चाः क
तवो व. (व.) तानि भूतं भव्यम (म) यच्च
वेदा वदन्ति अस्मान्मायी सृजते विश्वमेत

तस्मिं श्चान्यो मायया संनिरुद्धः - मायांतु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इति .....
... शात् अजात्वं महेश्वर कार्यत्वयोरविरो धः - तथाहि प्रलयकाले नामरूपे विहा य चिद्वस्तुरूपा मायापि सूक्ष्मरूपेण महेश्व रस्य शरीरतया तिष्ठतीत्यजा सृष्टि स..
..नाम रू पा प ...... तुकारणिकेति-य था आदित्यस्य सृष्टिसमये वसुद्यादि दे ... ट्य र ड़ा धारत्वेन मधुत्वं कार्यत्वंच त स्य पुनः प्रलयकाले मध्वादि व्यपदेशा नर्हात्यन्त सूक्ष्मरूपेणावस्थानात्- अकार्यत्वंच मधुविद्यायां प्रतीयते उथस बादित्यो देव मधु नैवा देवता नास्मे तैकल एव मध्ये स्थातेति श्रुतेः एवं प्रकृतेरजात्वेश्वरकारणत्वयोरविरोधः ।
९९।३ ...... ा नतीत्तासिद्धा - पुनरन्यत्, ते-

-त्त्वसिद्धानि पंच विंशति संख्यानि तत्त्वानि श्रूयंते इत्याशङ्क्य तत्परि[illegible] ...हृ... तुम धिकरणान्तरमारभ्यते

।। न संख्योपसंग्रहादपि नाना भा वादतिरेकाच्च ।।

.... यतेस्य विषयः यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोमृतं इति अत्र पंच पंच जनाः किं सांख्यतत्त्वानि श्रुति सिद्धाने वेति संशयः पंचविंशति संख्यायाः सांख्यशास्त्र सिद्धत्वात् अतत्तदभावात्- पंचपंचजना इति तान्येव प्रतिपाद्या नीति प्राप्ते ब्रूमः पंचपंचेति पंचविं शति संख्योपसंग्रहादपि नतानि सांख्या नि तत्त्वानि यस्मिन्निति यच्छब्दनिर्दि ष्ट परमेश्वरस्त्वममीषां प्रतीयते तेभ्य

एतेषां पृथक्भावात् आकाशस्य पृथक्
निर्देशेन च. तत्वातिरेकाच्च - तत्वातिरेक
स्तु ज्ञानाधिक संख्य .... अतो अत.
न पंच विंशति तत्व प्रसङ्गः किंच पंचपंच विं
शति संख्योपसंग्रहोपि न युक्तः दिक्सं
ख्ये संज्ञायामिति संज्ञाविषयो द्वयं स
६०A. मासः तस्मात्पंचज ? .... नाम केचित्
ते पंच पंचजना इत्युच्यंते सप्तर्षय इति
वत्. अतो न संख्यातत्व प्रसक्तिः - के
पुनरेते इत्यत आह--

॥ प्राणादयो वाक्यशेषात्॥

प्राणस्य प्राण मुत चक्षुष श्चक्षुः श्रो
त्रस्य श्रोत्रं अन्नस्यान्नं मनसो ये म
नो विदुरिति वाक्यशेषात् पञ्चजनसं
ज्ञिताः प्राणादयः पंचेन्द्रियाणीति गम्यन्ते
अतोपि न तीतिकत्व प्रसक्तिः - पुनरुपप

न्तिरुच्यते ॥

॥ ज्योतिषैकेषां स्रुत्यन्ये ॥

एकेषां कण्वाना मन्नस्यान्नमिति शा
खाभावे सं देवा ज्योतिषां ज्योतिरायुर्हो
पासतेऽमृत इत्युपक्रममातेन ज्योतिशब्दे
न पंच पंचजना इन्द्रियाणि ज्ञाप्यन्ते-
ज्योतिषां ज्योतिः प्रकाशकानामपि प्रका
शकं कहेत्युक्ता ततः पंच पंचजना इ
त्युक्ते हि ज्ञाने प्रकाशकानि पंचेन्द्रियाणि
इति गम्यन्ते -

॥ कारणत्वेन चाकाशादिषु य
था व्यपदिष्टोक्तेः ॥

यथा आकाशादिषु कार्यवर्गेषु कार
णत्वेन सर्वत्र वेदान्तवाक्येषु असद्वा इदम
ग्र आसीत् तद्धेदं तर्ह्यव्याकृतमासीत् इ
त्येवमादिषु निर्गत विशेषात्माका

इद मेकएवाग्र आसीदिति विशे॰ वाक्य
६०।३ निर्दिष्टस्यैव १ उ. ता. न. ता. ५ का. म.
कृतग्रहणं तस्मात्तु विशेषवाक्य कु.
ष्टान्. निन्द्रियाणामेवो क्तं न्तः सौत्तिकं त
त्वग्रहण योग॰ कथ मित्यत आह—

।।समाकर्षात्।।

सोकामयत बहुस्यामिति पूर्वनिर्दिष्ट
स्य सर्वज्ञस्यैवासद्वा इदमग्र आसीदिति
समाकर्षात् पूर्वनिर्दिष्टस्यैवाव्या
कृतस्य सच्च इह पाविष्ट अ. नरवाग्रौ
म्य इति समाकर्षात् यथा सच्चाव्यग्ग
म्यते तथात्रापि समाकर्षात् पंचज्ञ
ाना मिन्द्रिय त्वाव गतिरिति न विरोध४
अतः स्मर्तव्य तर्कशंकाप्रसङ्गः -पु
नरपि जीवात् परमेश्वरस्यान्यभाव
मुपपादयति।

॥ जगद्वाचित्वात् ॥

श्रूयते ऽस्य विषयः कौषीतकिब्राह्मणे
पालिषदि (?) ... इते ब्रुवाणीत्युपक्रम्य
यो वै बालाक एतेषां पुरुषाणां कर्ता य
स्य चैतत् कर्म स वै वेदितव्य इत्यादिकः
इह वेद्यत्वेन श्रुतः परमेश्वरो जीवो वे
ति संशयः जीव इति व ... कु. म. युक्त
पं. कृ ... ता इत्यादि सकलपुरुषक
र्तृत्वस्य जीवेपि विद्यमानत्वात् कर्म
शब्दस्यापूर्ववाचित्वात् अपूर्वस्य तद
र्थत्वात् निर्धूत सकलकर्मसंबंधे प
रमेश्वरे तदयोगात् जीव एवायमिति
६१. सि पुर्वं [?] पक्षः - सिद्धान्तस्तु कृ
मशब्दस्यैव तच्छब्दसामानाधिकरण्येन
क्रियत इति व्युत्पत्त्याच जगद्वाचित्वात्
जगत्कार्यवान् परमेश्वर एवात्र प्रति

पा॰भा॰ नहि जीवे सकल कर्तृत्व संभव॥ पुनराशङ्क्य परिहरति-
॥जीवमुख्यप्राणलिङ्गान्नेति चे-त्तद्व्याख्यातं॥
तथा च- श्रोष्ठी स्वं भुङ्क्ते एवमेवा-स्या श्रोष्ठिनं भुञ्जन्ति एवमेवैष प्राज्ञ आत्मा एतैरात्माभिर्भुङ्क्ते एवमेवैत आत्मानम् एतमात्मानं भुञ्जन्तीति यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवतीति जीवमुख्यप्राणलिङ्गदर्शनात् नासौ परमेश्वर इति न वाच्यं पूर्वत्त प्रा॰ तर्दनविद्यायां व्याख्यातत्वात्॥ इहापि पूर्वापरपर्यालोचनया ब्रह्मपरत्वे स्थिते तदनुरूपतया न्यलिङ्गानि नेतव्यानि पूर्वत्त ह्युपक्रमे ब्रह्म ते ब्रवाणीति

ब्रह्मोपाधिपूर्वं मध्येच यस्य वैतत्कर्मेति
सकलजगत्कर्तृत्व मुक्तं परत्त्वोपसंहारे
सर्वान्‌ पाप्मनोपहत्या सर्वेषांच भूता
नां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति
यएवंवेदेति ब्रह्मोपासनैकार्तं सर्वपाप
पहति पूर्वक स्वाराज्यं फलमुक्तं य
६१.१३ एवमस्य प्रा ..... ब्रह्मप १ ...... ऽत्रापि
जीवमुख्य प्राण लिङ्गानि तत्परतयैव ने
तव्यानि. पश्चातरमुच्यते ॥-
॥ अन्यार्थं तु जैमिनिः प्रश्न व्याख्या-
-नाभ्यामपि चैव मेके ॥-
भो. सुप्तंपुरुषमाजग्मतुस्तं हाजातश
त्रुरामन्त्रयांचक्रे. बृहन्‌ ......
वासः सोम ... जान्नेति सहतूष्णीमेव
शिश्ये तहृह एनं पप्या व्यान्नथे
प्रस्तेतदेव मुख्यस्याभिव्यक्त प्राणा.

नामाभिरामंताणेपि तदश्रावणेन तद्रूप
रं यष्टिघातें सत्युत्थानेनच प्राणव्यति
रिक्त जीव सद्भाव ... तिपादनं तदति
रिक्त परमेश्वरे प्रज्ञापनार्थमिति क्वैष
एत द्बाल् के पुरुषों शा ... भूत् कुत एतद्
भूत् कुत एतदागादिति प्रश्नाभ्यां दा सु
प्तः स्वप्नं न किंचन पश्यति अथास्मिन्
प्राण एवैकधा भवतीति सता सौम्य
तदा संपन्नो भवतीत्यादि वाक्यांतर
समानार्थात् तत्प्रतिवचनाच्च अवगम्य
ते - एकेवाजसनेयिनोपि स्पष्ट मस्मि
न्न बालाक्यजातशत्रुसंवादे एतत्समाना
र्थमधीयतें त ... हि यत्रैष एतत्सुप्तोभू
त् य एष विज्ञानमयः पुरुषः क्वैष तदा
भूत् कुत एतदागा इति प्रश्नः तदेषां
प्राणानामपि ज्ञानेन विज्ञानमादाय य एषों

तर्हि हृदय आकाशस्तस्मिंश्छेत इति प्रतिवच
६८ A. नं त १ ..... त्परमेश्वरस्वबाधं सकलज
गत्कर्तृत्वसिद्धं - मैत्रेय ब्राह्मणे सर्वत्तजी
वेश्वरयोरेकस्य शब्द विषयत्वे प्रतीयमा
ने तत्सामानाधिकरण्यं कथमित्येत
न्निरूपणायेदमाधिकरणमारभ्यते-
॥ ... कथान्वयात् ॥ -
बृहदारण्यके ... नवा अरे पत्युः कामा
य पतिः प्रियो भवति आत्मनस्तु कामाय पतिः
प्रियो भवति इत्यारभ्य आत्मावा अरे द्रष्टव्यः
श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादि
श्रूयते ... आत्मनस्तु कामायेत्यादि वा
क्ये भोगप्रतीतियुक्तया संसारित्वावग
मात् अत्र प्रतिपाद्यमानो जीव इति पूर्वपक्षे
प्राप्ते सिद्धान्तयाम उ परमेश्वर इति कुतः
अमृतस्य तु नाशास्ति व ... नेन आत्म

निरवलवरे हृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं इदं सर्वं यदयमात्मात्यादे येनेदं सर्वं विजानाति तं केन विजानीयात् इत्यव सानस्य कृत्स्नस्य वाक्यस्य परमेश्वरेन्वयात्.. नैग प्रीतियुक्तस्य जीवस्यानुवादेन परमेश्वर प्रतिपादनात् अविरोधः– कण्पमिह सर्वत्र जीवशब्देन परमेश्वराभिधानमिति चेन्न तदिदं मतांतरेणोपपद्यति –

॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ १

६२/१३ .. ‌ ... तमनिरवरहृष्ट इत्यानाक्तस्य वाक विज्ञानेन सर्व विज्ञानस्य सिद्ध्यै – जीवस्य तत्कार्यतया तदव्यतिरिक्तता मापादयितुं जीवशब्देन परमेश्वराभिधानमिति आश्मरथ्यो मेने ।

॥ उत्क्रमिष्यत एवं .. भावादि-
-त्यौडुलोमिः॥

उत्क्रमिष्यतो मुक्तस्य परमेश्वररूपाभा
वात् आत्मशब्देन परमेश्वराद्भेदाभि
धानमित्यौडुलोमिर्मेने॥

॥ अवस्थितेरिति काश-
-कृत्स्नः॥

य आत्मनि तिष्ठन् इत्यादिश्रुतेः जी
वात्मनि .. रमेश्वरस्यात्मतयाव
स्थानात् जीवशब्दवाच्यत्वं परमेश्व
रस्येति काशकृत्स्नो मेने॥ इदमेवं तु
सूत्रकारस्य मतद्वयमुपन्यस्य तद्विरोधे
नाभिधानात् अन्यस्यानभिधानाच्च
निश्चीयते प्र.. ल श्रुत्यानुगुण्यं चात
सम्भवति.. तथाह्युपर्बशिरसि सर्वाचे
फाचित्प्रवेशात् परमेश्वरस्य सर्वशब्दवा

ध्यत्वामिति श्रूयते । प्रथम खण्डे देवा ह वै
स्वर्गं लोकमगमन् ते देवा रुद्रमपृच्छ
६३ A न् को भवानिति । सोऽब्रवीदहमेकः प्र
थममासं वर्तामि च ह (भ) विष्यामि च
भविष्यामि च नान्यः कश्चिन्मत्तो व्य
तिरिक्त इति सोऽन्तरादन्तरं प्राविशद्दिशश्चा
न्तरं संप्राविशत् सोऽहं नित्यानि
त्यो ब्रह्मोहं ब्रह्माहं प्राञ्चो.... प्रत्यञ्चो
हं दक्षिणञ्च उदञ्चोहं अधश्चोर्ध्वञ्च
दिशश्च विदिशश्चाहं पुमान् पुमान् स्त्रि
यश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुप्
जगत्यनुष्टुप् चाहं छन्दोहं गार्ह
पत्यो दक्षिणाग्निराहवनीयोहं स..
-त्यो गौरोऽहं गौर्यहं ज्येष्ठोहं श्रेष्ठोहं
वरिष्ठोहं आपोहं तेजोहं ऋग्यजु
स्सामाथर्वाङ्गिरसोहं अक्षरमहं क्षरमहं

गुह्योऽहं अरण्योऽहं पुरुमऽहं पवित्रमऽहं अग्रं
च मध्यं च : हि रूप पुरस्तात् ज्योतिरित्य
हमेकश्च सर्वेच मामेव मां यो वेद सस
र्वान् वेदेत्यं तेन · द्वितीय खण्डे च -
पुर्वानुप्रवेशादेव यो वै रुद्रः स भगवान्
यश्च ब्रह्मा तस्मै वै नमो नमः यो वै रुद्रः
स भगवान् ... रूप विष्णु स्तस्मै वै नमो
नम इत्यारभ्य ब्रह्मं विष्णु महेश्वरोमा
विनायकादि सर्वप्रपंच शब्द वाच्यत्वं प्र
तिपाद्यते तया सर्वश्रुति सामरस्य वि
चारे सर्वेषां चिदचिद्वस्तूना मन्तर्यामि
६३ 13 ... या नुप्रविष्टः सर्वशरीरः सर्वशब्द
वाच्यः परमेश्वर शिव इति विज्ञायते
अतः काशकृत्स्न मतमेव समंजसम् ।।
पूर्वं जन्माद्यस्ययत इत्यधिकरणें
यतो वा इमानीति · पंच मां २।। त्युदाहर

पानपर … मै श्रूव .. स्य जगदुपादानत्वं सामान्येन सूचितं तद्विशेषत स्समर्थयि तुमिदमधिकरणमारम्यते

॥ प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात् ॥

तस्माद्वा एतस्मादात्मन आकाशस्संभूतः आकाशाद्वायुः … पृथिवी … नयनं देवं एक इत्यादि वाक्यान्यस्य विषयः एतेषु प्रसिद्धमुभयकारणत्वं युक्तं नवेति सन्देहः सन्देहस्य निमित्तस्य कुलालादेरुपादानं मृत्पिण्डादिभावादर्शनात् उपादानस्य मृत्पिंडादेर्निमित्त …. लादिभावादर्शनात् कथमेतस्मिन्निमित्तत्वं उपादानत्वंच जगत्कार्यं प्रतीति - पूर्वपक्षस्तु जगत्सृष्टौ निमित्तमेव नोपादानमिति कुतः असंभवात् नहि घट निर्माणः

कुलालः स्वयमेव मृत्पिंडभूय घटं क
रोति पटं वा कुविन्दः यदि कर्तुमिच्छेत्तन्न संभवत्येव अतो निमित्तभूतस्य ब्रह्मण उपादानत्वं न संभाव्यते निष्प्रयोजनं
च निमित्तस्योपादानं कल्पनं ...कु
६ए.
A कार्य निष्पत्तेः कुलालस्य मृत्पिंडा......
न्यत्वेऽपि घटनिष्पत्ति दर्शनात्- अतो ब्रह्म
निमित्तमेव नतूपादानमपीति अतोच्यते
जा.गु. तो निमित्तमुपादानं च ब्रह्मैव-
स्तब्धोस्युत तमादेशं प्राक्ष्यो येनाश्रुतं
श्रुतं भवति अमतं मतं विज्ञातं .... ज्ञा
तं मिति श्रुत्या येनादेशा निमित्तभू
तेन विज्ञातेन चिदचिद्रूपं सर्वं जगा
द्विज्ञातं भवतीत्यादेशा विज्ञानेन सर्ववि
ज्ञानं प्रतिज्ञानात्- यथैकेन मृत्पिण्डेन
...वि ज्ञातेन सर्वमिदं मृन्मयं विज्ञातं

स्यादिति तदुपपादक मृत्पिण्ड। दृष्टान्तानु परोधात्तु ब्रह्मणो निमित्तमातत्वे तद्विज्ञाने न सकल प्रपञ्चस्य ज्ञानं न संभवति - नहि कुलालज्ञानेन घटादिकार्यं न ज्ञायते किंतु तदुपादान मृत्पिंड ज्ञानेन · अतो निमित्तस्य ब्रह्मण उपादानत्वे तत्संभवतीति· ब्रह्मैवो पादान ~~[illegible]~~ मपि· आदिश्यते अनेनेत्या देश शब्देना देष्टृ भूतं ब्रह्मो ~~[illegible]~~ च्यते · न तदर्थान्तरत्व मुपादानस्येति विज्ञापयितुं हेत्वन्तरमाह·

।। अभिध्योपदेशाच्च ।।

तैदैक्षत बहुस्यां प्रजायेयेति निमित्त भूत स्योक्षेतु स्वव्रह्मस्य ब्रह्मणएव वि चित्र जगदाकारेण बहुभाव संकल्प उ

१.४.२३ पदिश्यते अतो ब्रह्म निमित्तादनन्य दुपादानं - ननु विश्वाधिको रुद्रो महर्षिः

हिरण्यगर्भं पश्यत जायमानमिति विश्वो-
त्तीर्णएव परमेश्वरो निमित्तभूतः स्व
व्यतिरिक्तप्रकृतौ स्वसङ्कल्पेन जायमा
नं सकलदेवप्रथमं हिरण्यगर्भं साक्ष
ष्टृ मनुग्राहदृष्ट्या पश्यदिति श्रूयते
विज्ञायते कथमस्य विश्वाकारत्वं प्र
कृतिरूपत्वेन संभवति मायांतुप्रकृतिं
विद्याद्विति इति मायायाः प्रकृतित्वं श्रू
यते तस्माद्विराडजायत विराजो पुरु
षः इति पुरुषस्य प्रकृतित्वमाम्नायते
अतस्तयां एव प्रकृतित्वेन जगदाका
रमुचितमित्यत आह

॥ साक्षाच्चोभयाम्नानात् ॥

साक्षात् प्रत्यक्षमेव वेदान्तभागेषु पर
मेश्वरस्य प्र... तित्वेन जगदाकारं नि
मित्तत्वेन जगत्पतित्वंच श्रूयते तथाहि

विश्वाधिको रुद्र इत्यादिना यथा विश्वा-
धिकत्वमवगम्यते तथा सर्वो वै रुद्र इत्या
दिना प्रकृतित्वाद्वि श्वरूपत्वमपि श्रूयते।
शतरुद्रीये। नमो हिरण्य बाहवे इत्यारभ्य
कुलुंचानां पतय इत्यं तेन विश्वाधिपत्यं
ततश्च नमः पर्णाय च पर्णशद्याय चेत्ये
तत्पर्यंतेन जगदाकारत्वं परमेश्वरस्य
९९८ A. श्रूयते प्रदेशांतरे च ब्रह्म वनं १ ब्रह्म
वृक्ष आसी। ब्रह्माध्यतिष्ठ द्भुवनानि धा
रयन्न इत्युभय श्रुतिः अप्यर्वशिरसि च
प्रथम द्वितीय खंडयो जगदाकार
त्वं तदुपरि जगदीश्वरत्वं च। ततः प्रत्यक्ष
मुभय .... च
प्रकृति निमित्तत्वेन परं ब्रह्म परमेश्वरश्री
वदति युक्तमेव किंच प्रमाणांतरमस्ती
त्याह।

॥ आत्मकृतेः ॥

तदात्मानं स्वयमकुरुतेति स्वस्यैव ज
गदाका .... स्व
रस्य अतस्स एवोपादानं निमित्तं च. -
ननु ज्ञान विकारास्पद हेय प्रपञ्चरूपेण
प्रकृतिभावेन कथं वर्तते - निरस्तसमस्त
दोषलव कळंको निस्सीम ....
.... कुश नित्य सिद्धैर्भवः
प्रपञ्चातीतः परमशिव इत्यत आह -

॥ परिणामात् ॥

नित्य शुद्धानं तस्य निरतिशयमैश्व
स्वभावस्यापि निमित्त स ....
.... गदाकारत्वे युक्तमेव -
चिदचिदाकारेण परिणामात् इन्त का
रण विकाररूपो हि परिणामः पूर्वरूप
परित्यागेन रूपान्तरापत्तिः परिणा...

६५७.13 . . . . ं भत्य रिष्टि यते
इति चेत रू्रव्यं यथा नि मित्तस्य प्रकृ
तित्वे ऽपि न विकारादि स्पर्शः तथा परि
णामः सं भवति कोयं पूर्व परिणामः
. . . . च्यता मितिचेत
शृणु विवेचयामः - यदा तमस्तन्न
दिवा न रात्रिर्न सन्न चासन् शिव एव के
वलः तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा
च तस्मात्... सृता पुराणीति यस्मिन्
काले वि . . . .
या दिवा रात्रि विभाग शून्यानाम् रूप
विशेष राहित्येन स्थूल सूक्ष्म - चेत
नाचेतन सदसद्भाव रूपा रहितं सर्व
मिदं तमोभूतं वर्तत - तदा ह्यपद्धतिः ^ दावा
. . . . द चिन्मात्र
स्वप्रकाशः परिशिष्टो भूत्वा तदक्षरं

तदेव तदानीं मृ.क्षर र रहितं नाशरहि
तं परमवस्तु तत्सवितुर्वरेण्यं तत्स
वितुरादित्यस्य पूर्वं तेजः........
........जः तदपि तदेव. तस्मा
तादृशात् स्वाविलीन स्वेतर निखिल चि
दचित्प्रपञ्चाद्वितीयात् पुराणी नित्य.
सिद्धा तत्काले तमोवनोदिनी महा
स्फुर........................।
६६ .. ताप्रवर्तत.. ततस्सोकामयत बहु-
स्यामिति नामरूपादि विभागरहितः
सूक्ष्म चिद्वस्तु शरीरकः कारणावस्थः
परमेश्वरः स्वविभक्त नामरूप चिदचि
द्वस्तु स्वशरीर..............
...... तस्येदं सर्वमसृजत. यदि
दं किं चेति स्वशरीरभूतं सूक्ष्मचि.
दचिद्वस्तु स्वस्माद्विभज्यत स्फुटतादे

प्र
~~...~~नुपपाविशदिति स्वतो विभक्ते चि
कूय
च्चिद्वस्तुनि स्वयमात्मतया प्रविशति
सत्त ....ंच
रूपेण बहुधा परिणतो भवेदिति पुरु
षस्य बालत्व युवत्वादिवत् ब्रह्मणोऽज-
शाच्छरीरिणः कारणत्वं कार्यत्वंच..
मायांतु प्रकृतिं विद्यान्मायिनंतु म..
.........................या ह्येतं सर्वमि
दं जगत् ॥ इति श्रवणात् मायायाः स
कल प्रकृतित्वं तद्विशिष्टत्वं महेश्वरस्य
तदवय.. भूते ना... भूतेन चिच्छक्ति
स्फ कलभूतेन भोक्तृत्व दशा.......
.... क्षापि स्ता ~~...~~
वगम्यते तथा केवलाच्छरीरात् व्यो
मनश्वा द्युत्पत्तिः संभवः आत्मनश्च
तथा केवलं मायाया जगदुत्पत्ति मि

है ईश्वरास्तु किंतु मर्त्य शरीरिणः...

६६ .... १ नः परमेश्वरात्

७. सकलचेतनाचेतन प्रकृति पुरुषोभिव्यक्तो भवति तद्रूपादीश्वरात् अव्यक्तरूप तु मुखाद्युत्पत्तिः तथान्य श्रुतिरीश्वरस्य पुरुषरूपमभिधत्ते पुरुषो वै.....

.... ३ परमेश्वरः कारणकार्य तत्त्वस्य विशेषादिति॥

॥ योनिश्च हि गीयते॥

साक्षात्परमेश्वर एव भूतयोनिरित्यु च्यते ः मासहार्यं परमे[illegible] श्व ....

.............................स्त

साक्षि तमसः परस्तादिति समस्त साक्षिणः सर्वज्ञस्य तमसः परस्य विश्वादुत्तीर्णस्य परम[illegible]मासहितस्य विशिष्टस्य परमेश्वरस्य एवं ....

.... ं चगीयते तत्स्योपादानमपिनि-
मित्तं परं ब्रह्मैव -

॥ एतेन सर्वे व्याख्याता व्या-
— ख्याताः ॥

जन्माद्यस्य यत इत्यादिना ए
तदन्तेन वेदान्तवाक्यानां व्याख्या
ने . . . . वे
दान्तरूपाः कर्मकाण्डमध्यपातिनः
पुरुषसूक्तशतरुद्रीय प्रभृतयो मन्त्र
ब्राह्मणभागाः स्मृतीतिहासपुराणागमा
दि पुक्तसूक्तविशेषाश्च व्याख्या . .
६६. A . . . . ं ह्यन्यो-
अपता कर्म प्रकरण पठितानां पु
रुषसूक्तशतरुद्रीयानां स्मृतीतिहासपु
राणादीनां च तात्पर्य लिङ्ग समन्वये
न ब्रह्मबोधकत्वं अस्ति न वेति संशयः

संशयबीजं प्रकरणमेतादृशं प्रकर
णगतानां पुरुषसूक्तादीनां मनुष्यात्
जीवपरत्वमेव समीचीनं ननित्यमुक्त
ब्रह्मविषयत्वं प्रयोजनाभावात् स्मृति
पुराणादीनामपि नैकार्थपरत्वमस्ति यत
स्तेषु कतिचित् ब्रह्माणं परं ब्रह्मेत्याहुः
कतिचिद्विष्णुं कतिचिद्रुद्रं कतिचि-
च्छक्तिमेव कतिचिद्वह्निं कतिचि
त्सूर्यं कतिचिदन्यमेवाननव स्या-
अतः एतेषां न ब्रह्मबोधकत्वमिति
प्राप्ते ब्रूमः पुरुषसूक्तादीनां ब्रह्म
बोधकत्वमस्ति तल्लिङ्गदर्शनात्.
तस्माद्विराडजायत आदित्यवर्णं तम
सस्तु पारे तमेव विद्वानमृत इह भवती
ति सकलकारणत्वतमसः परत्वामृतहेतु
त्वादीनां परमेश्वरलिङ्गानामत संबन्धो

दृश्यते. अत ईश्वर एवात्र पुरुषशब्दे
न प्रतिपाद्यते - शतरुद्रीये च साक्षात्पर
मेश्वरस्य जगदाधिपत्य जगदात्मकत्व नी
लग्रीवत्वादि लक्षणं श्रूयते अतः परमे
श्वरस्य तद्बोध्यत्वम(म्) युक्तं ननु प
६६ रमेश्वरस्य मैगळं: … कनिधान
स्य शतरुद्रीय प्रतिपाद्यत्वमयुक्तमिव प्रति
भाति. प्रथममेवात्र नमस्ते रुद्र मन्यव
इति हेयगुण मन्युसंबन्धावगमादिति चे
न्नैवं मपि चारणीयं मन्युशब्दस्यात्र
यज्ञवाचकत्वात् अथवा क्रोधपर्याय
त्वेपि मन्युशब्दस्य न क्रोधः दुष्ट निग्रहा
र्थं स्वेच्छागृहीत प्रकृतिगुणत्वेनास्य प
रमेश्वरे संबन्धाभावात् - पुराणादी
नां च तात्पर्यवशेन ब्रह्मविष्ण्वादि तत्
शब्दवाच्यं सर्वात्मकं सर्वज्ञं सर्व

शक्तिर्वां संवाधिकं असामान्यवैभव
कहृशाब्दार्थ विश्रान्ति पदं निखिलवे
दांत वाक्य सामरस्य समन्वये. तात्पर्य
वसान विषयं शिवं उमासहितं प
रमेश्वरं प्रति बोधकत्वं युक्तमेव. यद्दु
क्तं कर्म प्रकरण निमित्त मितितन्न: लिङ्गे.
न प्रकरण बाधो युक्त: अनेन न्यायेन
यत्र यत्र चेतने अचेतने वा जगत्कारणत्वा
दिकं श्रूयते- वेदादिषु प्रमाणवचने
षु तत्तत्त तद्दात्मा शिवएव वा ......
...... तत्र यत्र पुरुषार्थ विकाराद्वत्वा
दिको धर्म स्तत्तत्त शिवस्य परकाष्ठु:
शरीरं चिदचिद्रुस्त्वेव बोद्धव्यमिति
निरूपणं निरूप्यमिति सर्वं स
मंजसमेव ।। .....

इति

श्री नीलकण्ठशिवाचार्य-
विरचिते
शब्दमीमांसाभाष्ये पञ्चमस्या-
ध्यायस्य
चतुर्थः पादः

॥श्रीः॥

यथादर्शं प्रत्यादर्शीकृतं-

N Ranganatha Sastri

सम्यक् प्रतिकृतम्॥ यथामातृकं संशोधितम्
नौ. वै. वेङ्कटसुब्रह्मण्यशास्त्री.
६/१०/५३